265. *Martin Joachim Kummel* (486): Pāṇini 5,3,5 and the function of Sanskrit *etad*
266. *Marzenna Czerniak-Drozdzowicz* (826): Ekāyanaveda In search of the roots
267. *Masamichi Sakai* (525): On the momentariness of perception
268. *Masieg Karasinski* (77): Some remarks concerning Kaula Tāntric traditions of Kerala
269. *Mau Das Gupta* (923): Negation and interrogation in the dialect of the women seers of the Ṛgveda
270. *McComas Taylor* (03): Empowering the sacred: how a text creates discourse in a contemporary oral performance of the Bhāgavata Purāṇa
271. *Meelam Sharma* (217): दर्शनसङ्ग्राहकग्रन्थेषु सर्वमतसङ्ग्रहः – एकं विवेचनम्
272. *Meena Vijay Kumar* (448): The causation theory in Āyurveda philosophy
273. *Meera Rastogi* (16): An inquiry into evolution of conceptual development of Pratyabhijnā system of Kashmir
274. *Meera Viswanathan* (576): Contasling the Brahmana : Humour and orgument in the Vajrasucī.
275. *Michael Slouber* (502): Vulnerability and Protection in the Śaivatantras
276. *Michaels Axel* (1030): *Pūjā* and mantra in Newar domestic rituals and their handbooks
277. *Mills Libbie* (69): Dating and placing of early Saiva texts through Prāsādalakṣaṇa ù the characteristics of temples
278. *Mimi Savitri* (1034): Contesting Sanskrit and old Javanese inscriptions from Java: Inscriptions from Ratu Boko complex vs. Kedulan temple
279. *Minati Rath* (227): जगन्नाथस्य ऐतिह्ये वामदेवसंहिया: योगदानम्
280. *Mishra Ritu* (554): गृह्यसूत्रेषु सामाजिकनिष्ठा
281. *Mishra Sachchidanand* (739): Upamāna as a separate Pramāṇa
282. *Mislav Jezic* (391): Tat Tvam Asi in context-continued
283. *Mitali Chatterjee* (1122): The *Jayamādhava-mānasollāsa*: A manuscript and its relation with a Viṣṇu idol of a Gorakhpur temple
284. *Mithilesh Kumar* (688): अटलबिहारीवाजपेयिशतकस्य शास्त्रीयसमीक्षा
285. *Mohanta Swagata Das* (144): The concept of Urvaśī as portrayed by Rabindranath Tagore in Bengali literature
286. *Mohanty Sulok Sunder* (680): Divine aspect of Manes in the Śrāddhas
287. *Monica Kuwar Rathore* (370): Philosophical foundations of health and diseases in Āyurveda
288. *Mugdha Gadgil* (708): Feminine aspect of the Sun: Vedic, purāṇic and popular
289. *N.B. Biswas* (640): Vidyās in vedic literature and their practice on present day curriculum Dr
290. *N.K. Sundareswaran* (212): Scientific language and rational approach as reflected in Āryabhaṭīya Bhāṣya of Nīlakaṇṭha Somayājī
291. *Naoko Nishimura* (620): Processing of dairy products in the Vedic ritual, compared with Pāli
292. *Narayan R. Joshi* (955): Sphoṭa doctrine and physics of sound
293. *Narayana Dash* (416): समकालिकसंस्कृतकथासाहित्ये भारतीयता (रयीशः सीमा विसर्गः कालाय तस्मै नमः मूको रामगिरिः अन्यच्च स्वर्गपुर इत्यादीनां परिप्रेक्ष्ये)
294. *Natalia Lidova* (108): The World enacted in a Game. The concept of the krīḍanīyaka in the *Nāṭyaśāstra*-chair & convener
295. *Natalia Lidova* (108): Vṛttis in Nāṭyaśāstra chair & Convener
296. *Navjivan Rastogi* (273): Gāyatrī in the Monistic ṣaiva tradition of Kashmir
297. *Nicolas Dejenne* (661): An analysis of the re-writing of Paraśurāma-saga in a contemporary Sanskrit kāvya - Bhagvān Paraśurāma by Krishnadatta Sharma Shastri
298. *Nihar Purohit* (912): Pūrṇatā: A fondational paradigm of Trika philosophy
299. *Nina Mirnig (598)* The usage of the term Rudrāṁśa in early Śaiva Saiddhāntika sources
300. *Nirmala Kulkarni* (505): Text critical study of the Pativedanani hymns.
301. *Noel Sheth* (302): The justification of Kṛṣṇa's flight from Kālayavana
302. *Noémie Verdon* (570): Al-Bīrūnī's acquaintance with Sānkhya
303. "*Oliver Hellwig* (94): Ratha = Chariotö or "hero"? Computational approaches to polysemy in Sanskrit
304. *Oscar Figueroa-Castro* (102): Abhinavagupta's *Anuttara* in historical perspective
305. *P.C. Muraleemadhavan* (994): *Līlātilaka* on semantic consideration of Phonemes chair & Convener
306. *P.I. Ajithan* (1072): The term *Tantra* in early scriptures of Āyurveda
307. *P.K. Srinivasan* (791): *Navabhārata* - A biography of Pandit Jawaharlal Nehru
308. *Pandey Ramesh Kumar* (833): Significance of Vedic rituals in the works of Kālidāsa
309. *Pankaj Bhattacharya* (159): The binary digits zero and one: A discussion in the light of *Līlavātī* and *Āryabhaṭīya*
310. *Pankaja Ghai Kaushik* (1088): Law of evidence in Dharmaśāstra and Indian Evidence Act, 1872: An analytical study
311. *Paolo Magnone* (498): *Tejas* transactions in the Itihāsa-Purāṇa
312. *Paramanand Jha* (421): शिवराजविजयस्य शाब्दिकदृष्ट्या समीक्षणम्
313. *Park Changhwan* (612): The Sautrāntika notion of Ālambana and its Dar antika precursor

314. *Patrick McAllister* (622): The import of Śabdārtha in the theory of Apoha.
315. *Patrick Olivelle* (1079): Differing roles of Judge in the Arthaśāstra and Dharmaśāstras chair
316. *Peter Bisschop* (1092): Pancārtha before Kauṇḍinya
317. *Peter flugel:* Kārmic and Natural Causality in Jaina Philosophy
318. *Peter M. Scharf* (420): Is rule precedence in the Aṣṭādhyāyī uniform? chair
319. *Pierre-Sylvain Filliozat* (148): Opening of the linguistics section - chair & Convener
320. *Pierre-Sylvain Filliozat* (148): Noun and verb: Multiple processes of understanding in the Pāṇinian school- chair & Convener
321. *Prabhakar Prasad* (167): मीमांसान्यायानां पर्यावरणसंरक्षणे उपयोगः
322. *Prabhudevi Amogh* (877): Manuscript preservation in India: An overview
323. *Pradip Bhattacharya* (954): Was Draupadī ever disrobed?
324. *Pradyumna Sarma* (345): Rituals and customs as reflected in games: A study of Assamese folk games
325. *Prafulla K. Mishra* (319): Little known rhetorician Lokanātha and post-Mammaṭan poetics
326. *Prakash Prajini* (655): Computational analysis of *Sukanasopadesa* in *Kādambarī*
327. *Prasad Bhide* (378) and *Malhar Kulkarni* (17): Constituent structure in Sanskrit lexicography with special reference to the Deccan college dictionary project
328. *Prasanta Bandyopadhyay* (114): The Nyāya theory of inference and probabilistic epistemology
329. *Pratap Bandyopadhyay* (757): Grammatical speculations of Sanskrit literary critics
330. *Pratibha Manjari Rath* (533): Glimpse of Brahmanism and Buddhism in the Phimeanakas Sanskrit inscriptions of Kāmboja
331. *Pratik Dutta* (197): The Mīmāṁsaka and the Naiyāyika critique on the theory of Sarvajna of Jaina philosophy
332. *Pushpa Dikshit* (1104): पाणिनीयप्रक्रियाविज्ञानम्
333. *R. Devanathan*-Innovative Method in Teaching Sastra chair
334. *R. Sathyanarayanan* (518): Similarities and dissimilarities between *Smārta* and *Śaiva-prāyaścittas*
335. *R.P. Goldman* (979): *Ādyantaḥ the Uttarakāṇḍa's* challenges for its authors and readers chair & Convener
336. *R.P. Goldman* (979): Poet as seer, Poetry as seen: Reflections on visualization as a critical element in the conceptualization of Kāvya chair & Convener
337. *Rachna Rastogi* (464): मीरालहर्याः काव्यशास्त्रीयतत्त्वानां विश्लेषणम्
338. *Radha Madhav Bharadwaj* (1131): Interpreting religious Vratas and Utsavas in Sanskrit Poetic and semi-historical texts belonging to the fifth and twelfth centuries AD
339. *Radhakrishan C.S.* (881): Nityapūjā and Naimittikapūjā -A Perspective analysis.
340. *Radhavallabh Tripathi* (120): Śākuntala on modern stage
341. *Raffaele Torella* (993): Utpaladeva's lost Vivṛti on *Īśvarapratyabhijnākārikā*
342. *Rajan Raj* (8): The roles of conceptual *dharma* and corporal *Dharma* during the rescue of their husbands by Draupadī and savitrī (to be confirmed)
343. *Rajendra Nath Sarma* (768): Dharmaśāstra Its relevance to modern times
344. *Rajesh Sarkar* (363): नलोपाख्यानम् -- पारसीकसाहित्ये संस्कृतस्य
345. *Rajiv Malhotra* : Sanskrit and Politics of Knowledge
346. *Rajnish Shukla* (112): Non-violence and world peace of Mahāvīra
347. *Raka Jain* (695): आचार्यशान्तिदेवस्य शिक्षासमुच्चयकारिका - बोधिसत्त्वस्य व्यावहारिकमार्गोपदेशिका
348. *Ram Nath Jha* (351): Contribution of Vedānta to modern physics
349. *Ramachandran Nagaswamy* : Language of Harappan Inscriptions chair & Convener
350. *Ramakant Pandey* (1123): A brief sketch of Kacchavaṃśa
351. *Ramakrishnan Ramachandran* (977): नान्दीमुख-शोभनपितपूजनम्
352. *Ramanath Sharma* (43): Derivational system of Pāṇini's grammar chair & Convener
353. *Ramchandra Shastri* (294): चान्द्रव्याकरणस्थयोः लुप्तस्वर-वैदिकाध्याययोः पुनरुद्धारः
354. *Ramchandran Bhawani* (913): The role of Liú affix in Mimāmsā philosophy
355. *Ramkaran Sharma* (80): Introductory remarks
356. *Rani Dadhich* (1126): धर्मशास्त्रीयोऽप्रकाशितो ग्रन्थोऽनूप-विलासः
357. *Rasik Vihari Joshi* (874): The Lakṣmīsahasranāma of Venkaṭādhvarin
358. *Ratna Basu*
359. *Ratna Basu* (446): *Sampradāna-kāraka*: In the understanding of Pāṇini and his followers
360. *Reeta Gupta* (512): Elements of architecture in *Mayamata*
361. *Rekha Shukla* (200): Rasapriyāvibhāvanakāvya in contemporary Sanskrit literature
362. *Rewa Prasad Dwivedi* (1124): Bhoja's Sarasvatī chair
363. *Rita Chattopadhyay* (690): Indian theatre from Bharata's Nātyaśāstra to modern Kolkata theatre
364. *Roopa Chavda* (424): *Kṛṣnacarita* in Jain tradition
365. *Ruth Satinsky* (475): Some socio-political questions raised by the sudden appearance of Mount Meru in the Sanskrit epics and purāṇas, as well as in physical manifestations found in India and Southeast Asia
366. *S. Kumar* (843): Commentary of Pūrṇasarasvatī
367. *S. Lakshminarasimham* (50): समासान्ताः कस्य अवयवाः
368. *S.P. Narang* (382): Sanskrit and modern Indian languages chair & Convener
369. *S. Ramadevi Amma* (831): Sun worship and its relevance
370. *S.A.S. Sarma* (1030): The re-installation of damaged idols with special reference to the ritual literature of Kerala
371. *Sabrina Ciolfi* (387): Classical Sanskrit literature and romance in popular Hindi cinema: A brief analysis of

some motifs
372. *Sadanand Jha* (572): समासान्तशक्तिविमर्शः
373. *Sakaki Kazuyo* (413): Kāyasthas: Translators of Sanskrit classics into Persian
374. *Sakti Roy Chaudhury* (92): An issue relating to Sundaramiśra and Rāghavabhaṭṭa flashed: A sole surviving manuscript of a work on dramaturgy
375. *Sally Sutherland Goldman* (980): Critical evidence: Vālmīki's *Uttarakāṇḍa* and the critical edition
376. *Sally Sutherland Goldman* (980)-"When Everything Old is New Again"-Teaching Sanskrit in the new Millennium
377. *Samniang Luermsa* (1040)i: Hell and heaven in the *Mahavāstu Avadāna*
378. *Sampada Savarkar* (821): The significance of epithets in the Gītā
379. *Sampath Kumar Medavarpu* (04): Manuscript of Vidyāgaṇeśatantra: A new light on female Gaṇeśa
380. *San Sarin* (1074): Khmer loan words from Sanskrit language
381. *Sangeeta Gundecha* (1048): Recitation and performance: A case study in Kavalam Narayan Pannikkar's production of Avimārakam
382. *Sangyob Cha* (504): Examination on the status and role of the equilibrium (Upekṣā)
383. *Sapna Jain* (726): Theory of matter in Jaina philosophy
384. *Saraju Rath* (918): Inscriptional Nagari and its evolution from the early 7th to 14th CE
385. *Sarva Narayan Jha* (72): The nomenclature and order of weekdays is based on the order of the Grahas in the sky as viewed by the Indian *ṛṣis*
386. *Saswati Mutsuddy* (510): Environment in Buddhism: A study
387. *Satabdi Das* (190):Environmental concerns in Arthaśāstra and its contemporary relevance
388. *Satoshi Ogura* (853): Brahman's outlook on Muslims: In the case of medieval Kashmir
389. *Satya Prakash Sharma* (1127): Manuscripts as a source of understanding of art
390. *Satyapal Singh* (543): Nomenclature in the meta-language of Pāṇini
391. *Satyavrat Shastri*
392. *Satyawati* (926): वेदेषु मानवाधिकारः
393. *Shailaja Katre* (551) and Mahesh Deokar (761): Comparative study of Pratyāhāra Sūtras
394. *Shalin Jain* (975): Piety, laity and royalty in early medieval India: Narratives from the Jain Sanskrit tradition
395. *Shankarji Jha* (490): The five forbidden applications of Yaṅluk (*Yaṅ*-dropped) the second frequentative/intensive base (*Pancaitāni na Yaṅluki*)
396. *Sharma Manju Lata* (366): आधुनिकसंस्कृतकवितायां बिम्बविधानम्
397. *Sharon Ben-Dor* (562): On the terms *gā, mā* and *dā* etc. in the *Aṣṭadhyāyī*
398. *Shashi Prabha Kumar* (239): Consciousness and congnition in Vaiśeṣika philosophy
399. *Shashi Tiwari* (90): Yogic Prāṇavidyā - A means of Self-realisation in Upaniṣads
400. *Sheel Nigam* (814): श्रीमूलशङ्करमाणिकलालविरचिते प्रतापविजयनाटके सङ्गीततत्त्वानि
401. *Shefali Priyadarshini* (358): Environmental science in Chāndogya Upaniṣad
402. *Shivanee Chatterjee* (426): Studies of advanced stages of meditation in the Tibetan Buddhist and Vedic traditions. A comparison of general changes
403. *Shohei Ichimura* (807): An examination of Prof. Murti's attempt of equation between Hindu Advaita theory and that of Buddhist Yogācāra theory of *Advaya* chair & Convener
404. *Shri Krishan Sharma* (497): Preparation on the word corcordance of the Mahābhārata
405. *Shripad Bhat* (647): Khaṇḍadeva
406. *Shruti Rai* (395): Júāna as Vikalpa
407. *Shrutidhara Chakravarty* (127): Modernism in Sanskrit literature
408. *Shukla Mukherji* (134): An unpublished manuscript of Gītagovinda with Jagaddhar's commentary (in Bengali script)
409. *Simon Brodbeck* (484): Triśaṅku, Hariścandra, and the *rājasūya*
410. *Singh Pramod* (699): जैनदर्शने प्रमाणस्वरूपम्
411. *Sir James Mallinson* (1101): Śaivism and Haṭhayoga
412. *Smitha Sabu* (644): Socio-political causes behind the origin of philosophical dramas
413. *Sombat* (1142): The shift of meaning of the word Aśvattha>Assattha the sacred tree in Sanskrit and Pali Buddhist texts: A case study of Thai translation
414. *Somesh Mishra* (335): Scientific Approach in Buddhist Texts
415 *Somnath Sarkar* (318):History of vegetables in ancient India
416. *Sonal Nimkar* (1163): Nāṭyaśāstra and Bharata-nāṭyam
417. *Soniya* (589): A new model of Pāṇini's Aṣṭadhyāyī in teaching methodology of Sanskrit grammar
418. *Sreenath Nair* (1044): Neuro-aesthetics: Rasa theory and neural mechanism
419. *Srikant Bahulkar* (990): *Medhajanana* in the Atharvaveda tradition
420. *Sripad Bhat* (674): Refutation of Matvarthalakaṇa by Khaṇḍedeva
421. *Stephen Thomson* (361): Do the *Uṇādi-sūtras* serve to show that every Sanskrit word derives from a *Dhātu*?
422. *Stuart Ray Sarbacker* (534): Vedic elements of Pātanjala yoga
423. *Subhadra Desai* (1059): Music and its relation with vedic chanting: Textual (oral) preservation and its development (in the form of music)
424. *Subodh Sharma* (101): स वाचको विशेषाणां सम्भवात् द्योतको वा
425. *Subrahmanya Sarma*: Sources of Energy Vedic Concepts
426. *Subuddhi Charan Goswami* (834): Editing of *Pakṣatācintāmaṇitippaṇī* by Kanāda Tarkavāgīśa
427. *Sudeep Jain* (972): सम्प्राजः अशोकस्य गिरनाराभिलेखस्य भाषिकानुशीलनम्
428. *Sudeshana Bhattacharya* (765): The manuscript of *Āyurvedavicāra*: A study
429. *Sudhir Lal* (941): Critical text: Indian context

(Nature, Development and Continuity)

430. *Sudip Chakravortti* (149): Literature of Ishwarachandra Vidyasagara

431. *Sugandha Dani* (538) and C.S. Warnekar (1063): Comparative study of phonetic patterns in Chandaḥśāstra and binary patterns in genetic algorithms

432. *Sujata Purkayastha* (68): A critique of Śankarācārya's refutation of *Vijúanavāda*

433. *Sukesh Sharma* (619): काश्मीरक्रन्दनम् - एकम् आलोचनम्।

434. *Sukhamay Bhattacharya* (681): योगचतुष्टये विवेकानन्दमननम्।

435. *Sumant Shilpa*(1041) and *Julieta Rotaru* (935): A new edition and an annotated translation of *Kauśikasūtra*

436. *Sundari Siddhartha* (20): The Cātaka legend as *anyokti* and *kavi-samaya* in the rare, unpublished manuscript - *Cātakāṣṭakam*

437. *Suraj Pandit* (536): Understanding art at Kanheri in textual context

438. *Surekhaben Patel* (34): A critical study of Śrī Nīlakaṇtha Dīkṣita's *Kalividambana*

439. *Surendra Kumar Brahmachari:* Comparative inquiry into the linguistic models of Pānini and Noam Chomsky chair

440. *Sushama Sharma* (1128): वाग्भटालङ्कारस्य टीकानां पाण्डुलिपयः।

441. *Sushma Jatoo* (940): Sacred geography of Amarnath: textuality and history

442. *Sven Sellmer* (850): Towards a model of the versification technique of the epic poets

443. *Swapna Devi* (637): भगवद्गीता जीवनदर्शनं च

444. *Swarnalata Panda* (55): ध्रुवमपाये अपादानमिति सूत्रे ध्रुवपदार्थविचारः।

445. *T. Madhu* (852): Architecture in Kauṭilya's Arthaśāstra

446. *T.I. Radhakrishnan:* Scientific basis of Vedas

447. *Taisei Shida* (385): Some editorial notes on the Śābdābhikaraṇa section of the Sucaritamiśra's commentary on the

448. *Takahiro Kato* (12): Bhāskara's concept of *Júānakarmasamuccaya*

449. *Takanori Suzuki* (986) : Empirical facts and the Vaiśeṣika system of categories: Two directions of Uddyotakara's exploration for the ground of sound inference

450. *Tamura Masaki* (282) : On ӕreasoning from similarity of season' (Rgyu mtshan mthungs pai mgo snyoms)

451. *Tanmay Kumar Bhattacharya* (339): कृष्णात्रेयकवेः काव्येषु प्रतिबिम्बिता सामाजिकी स्थितिः।

452. *Thennilapuram Mahadevan* (965): The text-critical importance of the Śakuntalā-Yayāti transposition in the *Mahābhārata*

453. *Thiagarajan Ganesan* (58): Concept of *mukti* and its means in *Śaivasiddhānta*

454. *Thomas Kintaert* (423): Crossing borders - The journey of the Indian lotus

455. *Thomas Kintaert*: Nāṭyaśāstra and its heritage: Some examples from visual and performing arts

456. *Timothy Lubin* (1136): Domestic ritual codes and formation of Dharmaśāstra genre chair & Convener

457. *Tiwari Shardindu Kumar* (842): आधुनिक-संस्कृतसाहित्ये पं. वासुदेवशास्त्रिणाम् अवदानम्।

458. *Tiziana Pontillo* (433): Where the sense is intended although the corresponding speech unit is not employed: Lopa and other devices directly or indirectly compared Pataújali

459. *Toon Van Hal* (1055), *Christophe Vielle* (1056) and *Jean-Claide Muller* (268): Grammatica Grandonica, the lost Manuscript of Hanxleden's Sanskrit Grammar Rediscovered

460. *Toru Yagi* (126): On the so-called predicative instrumental

461. *Toshihiro Wada* (987): Gaṅgeśa's theory of the meaning of verbal suffixes (ākhyāta)

462. *Umakant Chaturvedi* (654): नैषधीयचरिते अपाणिनीयाः प्रयोगाः

463. *Upadhaya Ramanuj* (451): यागीयसुरासोमयोः याथार्थ्यम्

464. *Upama Barman Deka* (872): A woman's life depicted in the Dharmaśāstras

465. *Upender Rao Choudury* (713): similies in Khuddakanikāya

466. *Urmila Anand* (133): Religious consciousness in modern Sanskrit Mahāvyas

467. *Urvashi Patel* (506): Bhāsarvajúa as a revolutionary Naiyāyika

468. *Usha Kataria* (557): Yashodharamahakavya of Ogeti Parikshit Sharma: A study

469. *Usha Shukla* (1139): Medieval commentators of vedic texts and texual criticism

470. *V.Kannan* (1154): Contribution of Sanskrit to mathematics chair

471. *V.K. Goyal* (394) and Vijaya Rani (187): Quantum physics and the Buddhist theory of *Kṣaṇa* and *Kṣaṇa sanātana* (moment and moment-continuum)

472. *V.V. Premalatha* (869): *Śrīguruvāyu-pureśamāhātmyam* - A study

473. *Vanishri Bhat* (1150): Algebra and geometry in *Śulbasūtras*

474. *Varada Khaladkar* (910): Text and context: Understanding *Bhīma-Māhātmya* and its sacred geography

475. *Vasant Kumar Bhatt* (381): कालिदासस्य महाकाव्ययोः सार्थकानां पाठभेदानां विशिष्टं कारणं मौलिकपाठानुसन्धानं च

476. *Vassiliki Deroukaki* (716): Ṛgveda and Greek mythology

477. *Vedmitra Arya* (229): सारस्वतव्याकरणे प्रक्रियासारल्यम् - सुबन्तसन्दर्भे

478. *Velizar Sadovski*: Form invariants and variations in Veda and Avesta: a comparative and historical approach

479. *Venkatesh Murthy* (772): अद्वैतवेदान्त-साम्प्रतिकविज्ञान-योर्जगदुपादनविषयकं चिन्तनम्

480. *Vergiani Vincenzo* (995): A Lost Vākyapad Iyakārikā on Āpadeva

481. *Vidyut Aklujkar* (1134): Lakṣmā in Subhāṣita collections

482. *Vijay Kumar Jain* (586): बौद्धदर्शने अनेकतायाम् एकता

483. *Vijay Kumar Sharma* (466): शास्त्रीयसङ्गीते श्रुतिः

484. *Vijay Kumar Singh* (577): Fundamental nature of things as described in Vigrahavyāvartanī and the right view

485. *Vijay Rajopadhyaya* (997): A fresh light on Yuddhajayotsava: A manuscript on Tantraśāstra

486. *Vijay Shankar Shukla* (939): The *Atharvaveda*: Fountainhead of the medical sciences

487. *Vijaya Rani* (187): Concept of commonness (similarity) and the Buddhist theory of Apoha

488. *Vimalendu Kumar* (357): मम्मटमुकुलभट्टयोर्वृत्तिविवेकः।

489. *Vinaya Kshirsagar* (563): On a case in the Śaunakīya Caturadhyāyikā

490. *Vinod Kumar Gupta* (804): छन्दःशास्त्रीयं गणितविज्ञानम् -- एकं परिशीलनम्।

491. *Viroopaksha Jaddipal* (182): The complexities in the critical recension of *Laghuṭīkā* of *Prakāśavar ṣa* on the Kirātārjunīya of Bhāravi

492. *Vishvobandhu* (248): Semantic and historical approaches to Yāska's etymologies (a critical study with respect to the names of earth as enumerated in the Nighaṇtu)

493. *Vishwa Adluri* (963): Philosophical aspects of *bhakti* in the *Mahābhārata*

494. *Vitus Angemeier* (905): Water, phlegm and moon-the meaning of *Soma* in classical Āyurveda

495. *Vrindavan Bihari Das* (1078): Original Sanskrit manuscript of Nandasa's *Tattvasāraprakāśinī*

496. *Wagish Shukla* (1067): Indian astronomy chair

497. *Watanabe Toshikazu* (494): Dharmakīrti on *Pratijnārthaikadeśa*

498. *Wendy J. Phillips-Rodriguez* (924): Scripts vs. manuscripts: two independent evolutionary processes in the *Mahābhārata* textual tradition

499. *Wiebke Petersen* (753): On the descriptive techniques for Phonological classes in Pāṇini's grammar

500. *Y.S. Gayathri Shastry* (442): Some of the mathematical concepts flourished in ancient India

501. *Yigal Bronner* (992): Birds of a feather: Vāmana Bhaṭṭabāṇa's Haṁsasandeśa and its inter-texts-chair & Conener

502. *Yogesh Atri* (449): बघाटीभाषायां संस्कृतप्रभावः।

503. *Yohei Kawajiri* (851): Interpretations of the opening verse of the *Iśvarapratyabhijnākārikā* with special reference to a double character of the recognition

504. *Yuki tomonari* (346): Just a cavil or not: An example of outsider's dispute on the *Aṣṭādhyāyī*

505. *Yuko Yokochi* (1076): Triumph of Śaivism disguised by that of Buddhism: A study in the ninth century Kashmiri poem *Kapphiṇā- bhyudaya.*



सम्मेलनस्य उद्घाटनं कुर्वन्तः विद्वांसः

## प्रवृत्तम् अन्ताराष्ट्रियसंस्कृतशोधसम्मेलनम्

नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य हरिद्वारस्थ-उत्तराखण्डसंस्कृतविश्वविद्यालयस्य च संयुक्तोद्यमे ०९.०९.२०११ तः ११.०९.२०११दिनाङ्कं यावत् अन्ताराष्ट्रियसंस्कृतसम्मेलनं प्रवृत्तम्। सम्मेलनमिदं प्रामुख्येन वैश्विकसन्दर्भे संस्कृतमिति विषयाधारितमासीत्। अस्य सम्मेलनस्य उद्घाटनसमारोहः ०९.०९.२०११ दिनाङ्के हरिद्वारे खडखडीस्थ-निष्कामसेवाट्रस्ट् इत्याख्ये स्थाने आयोजितोऽभवत्। सरस्वतीसमर्चनपुरस्सरम् अतिथयः दीपप्रज्वालनमकुर्वन्। कार्यक्रमेऽस्मिन् अध्यक्षत्वेन पद्मभूषणज्ञानपीठाभ्यामलङ्कृतो विद्वान् आचार्यसत्यव्रतशास्त्री, मुख्यातिथित्वेन उत्तराखण्डप्रदेशस्य मुख्यमन्त्री डा. रमेशपोखरियाल'निशङ्कः', विशिष्टातिथित्वेन उत्तराखण्डसर्वकारस्य संस्कृतशिक्षा-आबकारी-पर्यटनमन्त्री श्रीमदनकौशिकः, मुख्यवक्तृत्वेन नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः राधावल्लभत्रिपाठी च आसन्। उत्तराखण्डसंस्कृतविश्वविद्यालयस्य कुलपतिः डा. सुधारानीपाण्डेया स्वागतभाषणं कार्यक्रमस्य रूपरेखां च विहितवती।




हरिद्वारे सम्पन्नस्य शोधसम्मेलनस्य कानिचन दृश्यानि

# समनुष्ठितः संस्कृतसप्ताहोत्सवः

नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानेन १०-१६ अगस्त, २०११ इत्यवधौ संस्कृतसप्ताहोत्सवः भव्यतया समाचरितः। सप्ताहव्यापिनि अस्मिन् महोत्सवे विविधकार्यक्रमाः समायोजिताः अभूवन्। १०.०८.२०११ दिनाङ्के संस्थानस्य सम्मेलनप्रकोष्ठे पूर्वाह्णे १०.०० वादने महोत्सवस्यास्य उद्घाटनकार्यक्रमः प्रवृत्तः। मङ्गलाचरणेन समारब्धेऽस्मिन् कार्यक्रमे तावत् अध्यक्षत्वेन संस्थानकुलपतिः आचार्यः राधावल्लभत्रिपाठी मुख्यातिथित्वेन आचार्यः अभिराजराजेन्द्रमिश्रः च आस्ताम्। प्रसिद्धा वैय्याकरणा डा. दीक्षितपुष्पा अत्र उत्सवमूर्तित्वेन मञ्चासीना आसीत्। आदौ स्वागतभाषणे डा. रमाकान्तशुक्लः मुख्यातिथेः अभिराजराजेन्द्रमिश्रस्य सस्वागतं परिचयं संस्कृतसाहित्ये तस्य अवदानं च प्रास्तौत्। अवसरेऽस्मिन् सः स्वाशयं प्राकटयत् यत् 'उत्तरप्रदेशे लब्धजन्मा प्राध्यापक-प्रवाचक-आचार्य-कुलपतिपदेषु यथाक्रमम् विहितसेवः सः साहित्याकादमी-पुरस्कृतिमलभत। इण्डोनेशियादेशे सः वर्षत्रयं यावत् अभ्यागताचार्यत्वेन कार्यं कुर्वाणः बहून् ग्रन्थान् अरचयत्। जानकीजीवन-वामनावतरण-वाग्वधूटी-प्रमद्वरा-प्रशान्तराघव-शैशव-अभिराजयशोभूषण-प्रभृतयः तत्प्रणीतग्रन्थाः तस्य कवित्वं विद्वत्तां च प्रमाणयन्ति इति।' तदनु डा. के. बी. लालेन आचार्यकेशवदेवशास्त्रिप्रणीता ग्रन्थाः संस्थानग्रन्थालयाय समर्पिताः।



संस्कृतदिवसावसरे भाषमाणः डा. मुकुन्दकामशर्मा

ततः मुख्यातिथिः आचार्यः अभिराजराजेन्द्रमिश्रः आधुनिकसंस्कृतसाहित्यस्य विस्तृतिं विवृण्वन् अत्र लोकप्रतिबिम्बनं लोकचेतनां च प्रत्यपादयत्। 'आधुनिकसंस्कृत-रचनाकाराः आत्मप्रशंसां विहाय राष्ट्रसम्मानं सर्वोपरि मन्यन्ते' इति मिश्रवर्यस्य दृढीयान् अभिमतः। सः स्वीयवक्तव्ये संस्कृतस्य स्वर्णिमं मङ्गलमयं च भविष्यम् आकलयत्। तदनन्तरं संस्थानकुलपतिः सभाध्यक्षश्च विगतवर्षेषु प्रवर्तितानां कार्यक्रमाणां विविधानां योजनानां च परिचयपुरस्सरं संस्कृतविकासाय संस्थानस्य प्रतिबद्धतां प्राकटयत्। सः उक्तवान् यत् 'संस्थानेन प्रकाशितग्रन्थराशिना समस्तभारतवर्षस्य सांस्कृतिकसामाजिकैक्यं दृढतरं जायते इति।' सः भारतशास्त्रस्य महतः विदुषः आचार्यगोविन्दचन्द्रपाण्डेयान् स्मारं स्मारं स्वश्रद्धाकुसुमाञ्जलिं समार्पयत्। आधुनिकसंस्कृतसाहित्ये समकालीनपरिप्रेक्ष्येषु समाजस्य वर्णनं स्यादिति सः आत्माभिप्रायं प्राकटयत्। धन्यवादज्ञापनं श्री कू. वेङ्कटेशमूर्तिः मञ्चसञ्चालनं डा. रत्नमोहनझा च अकुरुताम्।



संस्कृतदिवसावसरे सभां सम्बोधयन्
आचार्यः राधावल्लभः त्रिपाठी

तत्पश्चात् प्रवृत्ते विद्वत्सपर्याकार्यक्रमे वैयाकरणविदुषी डा. दीक्षितपुष्पा पुष्पगुच्छस्मृतिचिह्नफलराङ्कवैः कुलपतिना सत्कृता। विद्वत्सपर्याख्यायाः अस्याः शास्त्रचर्चायाः विषयः आसीत् 'व्याकरणशास्त्रे प्रस्थानपरीवर्ताः'। अत्र डा. दीक्षितपुष्पायाः वैदुषीं तत्प्रणीतग्रन्थान् चावलम्ब्य डा. रमाकान्तपाण्डेय-डा. ब्रजभूषणओझा-डा. विष्णुकान्तपाण्डेयाः स्वीयाभिप्रायं प्रस्तुतवन्तः। ततः कुलपतिः आचार्यः राधावल्लभत्रिपाठी तस्या मौलिकं योगदानं व्याकरणपरम्परायां स्थानं च प्रत्यपादयत्। उत्सवमूर्तिः डा. दीक्षितपुष्पा उक्तवती यत् 'महर्षिपाणिनेः पद्धतिं सारल्येन उपस्थापयितुं तस्याः प्रयासाः प्रवर्तन्ते इति।'


अपराह्णे संस्थानकुलपतेः आचार्यराधावल्लभत्रिपाठिनोऽऽध्यक्ष्ये काचित् कविचर्चा प्रवृत्ता। अस्मिन् कविचर्चाकार्यक्रमे डा. रमाकान्तशुक्लः 'सुरभारती विजयते', 'भारतजनताहं' च, आचार्यराजेन्द्रमिश्रः 'दैवज्ञं कं पृच्छेयम्', 'शनैः शनैः' च, डा. दीक्षितपुष्पा 'जना इमे द्विषन्ति', केन हेतुना', 'के' च, डा. नोदनाथमिश्रः 'कथय कीदृशी दुहिताऽहम्' श्रावितवन्तः। अत्रैव आचार्यराधावल्लभत्रिपाठी 'कूपकम्', 'सारं सारम्' च अश्रावयत। अस्य कार्यक्रमस्य सञ्चालनं डा. रत्नमोहनझा अकरोत्।

११.०८.२०११ दिनाङ्के विद्यालयीयच्छात्राणां 'निबन्धस्पर्धा' आयोजिता। कनिष्ठ-वरिष्ठवर्गयोः यथाक्रमं 'महाभारतम्' 'मम जीवनस्य अविस्मरणीया घटना' चेति विषययोः निर्दिष्टा स्पर्धा प्रचलिता। अपराह्णे 'कविसपर्या'-कार्यक्रमः समायोज्यत। कार्यक्रमेऽस्मिन् कवेः डा. जगन्नाथपाठकस्य काव्यान्यवलम्ब्य चर्चा प्रवृत्ता। सर्वादौ डा. रमाकान्तशुक्लः कविवरस्य डा. जगन्नाथपाठकस्य परिचयं प्रादात्। तदनु डा. बनमालीबिश्वाल-डा. रमाकान्तपाण्डेय-डा. मञ्जुलताशर्म-आचार्यराजेन्द्रमिश्रैः कविप्रणवस्य डा. पाठकस्य काव्यानां वैशिष्ट्यं माहात्म्यं च प्रकाशितम्। तदनु मृदुस्वभावः विनीतहृदयः च डा. जगन्नाथपाठकः स्वीयकाव्ययात्राविषये आत्मोद्गारं प्रस्तुतवान्। सभाध्यक्षः आचार्यः राधावल्लभत्रिपाठी अपि स्वीयमभिमतम् अकथयत्। कविसपर्याख्येऽस्मिन् कार्यक्रमे कापिशायिनी (साहित्याकादमी-पुरस्कृतकाव्यग्रन्थ)-आर्यासहस्राराम-जगन्नाथसुभाषितप्रभृतीनां ग्रन्थानां चर्चा जाता। कार्यक्रमान्ते संस्थानकुलसचिवः धन्यवादं ज्ञापितवान्। कार्यक्रमं डा. रत्नमोहनझा सञ्चालितवान्।

१२.०८.२०११ दिनाङ्के देहलीस्थानां विभिन्नविद्यालयीयच्छात्राणां स्तोत्रपाठ-भाषणस्पर्धे समायोजिते। १३.०८.२०११ दिनाङ्के नवदेहलीस्थ-राष्ट्रियसंग्रहालयस्य प्रेक्षागृहे संस्कृतसप्ताहस्यास्य केन्द्रीभूतः कार्यक्रमः 'संस्कृतदिवससमारोहः' समायोज्यत। मानवसंसाधनविकासमन्त्रालय-राष्ट्रियसंस्कृतसंस्थान-श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठैश्च संयुक्तरूपेण श्रावणीपूर्णिमादिने कार्यक्रममेनं प्रतिवर्षानुसारं समायोजयन्त। अत्यन्तं भव्यतया आयोजितेऽस्मिन् कार्यक्रमे सर्वादौ सर्वैः समुपस्थितैः स्वर्गीयाय वाचस्पत्युपाध्यायाय मौनश्रद्धाञ्जलिः अर्पिता, यस्य खलु सन्निधौ विगतेभ्यः षोडशवर्षेभ्यः संस्कृतदिवसोत्सवः पर्यपाल्यते स्म। श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य शिक्षकैः वैदिकमङ्गलाचरणं विहितम्। तदनु मञ्चस्थैः अतिथिभिः सरस्वतीसमर्चनपुरस्सरं दीपप्रज्ज्वालनं कृतम्। श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य डा. अन्विता शर्मा छात्राभिस्समं सरस्वतीवन्दनां कृतवती। एतदनन्तरं यथाक्रमं श्रीविजयकृष्णहाण्डिकि-डा. मुकुन्दकामशर्म-श्री एम्. एन्. कृष्णमणि-आचार्यराधावल्लभत्रिपाठि-डा. शशिप्रभाजैन-अहल्या गोगोई-आचार्यगयाचरणत्रिपाठि-आचार्य के.बी.सुब्बरायुडुप्रभृतयः पुष्पगुच्छराङ्कवश्रीफलादिभिः सत्कृताः। ततः श्रीलालबहादुरशास्त्रि-राष्ट्रियसंस्कृतविद्यापीठस्य छात्रैः 'वन्दे मातरम्' इति गीतम् अत्यन्तमाकर्षकरीत्या प्रस्तुतम्।


श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य कार्यवाहः कुलपतिः डा. शशिप्रभा जैन स्वागतभाषणे संस्कृतस्यैतिह्यं प्रस्तुवन्ती राष्ट्रियैक्ये तस्य भूमिकां प्रत्यपादयत्। सा उक्तवती यत् 'मतभेदे सत्यपि दर्शनानां भाषा संस्कृतमेवास्ति। अपि च संस्कृतज्ञानां कृते अयं सङ्कल्पदिवस वर्तते इति।' राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः राधावल्लभत्रिपाठी, यः खलु अस्मिन्नैव दिने संस्थानकुलपतित्वेन वर्षत्रयं पूरितवान्, उपोद्घातभाषणे अत्यन्तं प्रभाविरूपेण संस्कृतसंरक्षणस्य विषये आत्माभिप्रायं प्रकटितवान्। स्वीयभाषणे सः विल्सन्-प्रसङ्गमपि उपस्थापितवान्। साम्प्रतिककालं संस्कृतसर्जनायाः अभूतपूर्वं कालं मन्यमानः सः यान्त्रिकानुवादस्य (Machine Translation इत्यस्य) आवश्यकतां प्राकटयत्। तदनु भारतीयसर्वोच्चन्यायालयस्य मान्यो न्यायाधीशः डा. मुकुन्दकामशर्मा सभां सम्बोधयन् राष्ट्रियैक्य-वैश्विकीकरण-व्यावसायीकरण-प्रबन्धन-प्रभृत्याधुनिकाः अवधारणा उपस्थापयन् वर्तमानकाले तत्र तत्र उपनिषदां सिद्धान्तानां महत्त्वं विवृणोत्। 'कौटिल्यार्थशास्त्रस्य सिद्धान्ताः आधुनिकशासनविधौ अत्यन्तं प्रभाविरूपेण फलदायिनः सन्ति' इत्यपि सः प्रत्यपादयत्। प्रबोधनानन्तरं सः पाण्डुलिपिसांख्यिकीकरणस्योद्घाटनम् ई-ग्रन्थानां च लोकार्पणं विहितवान्। तदनु संस्थानेन मुद्रितानां ग्रन्थानां लोकार्पणं वेदिकासीनैः विद्वद्भिः कृतम्। ततः भारतशासनस्य भूतपूर्वः पूर्वोत्तरक्षेत्रीयविकासमन्त्री श्रीविजयकृष्णहाण्डिकिः आध्यक्ष्यीयभाषणे संस्कृतस्य जनभाषात्वं निरूप्य भारतीयशिक्षानीतौ अपेक्षितस्थानाभावे जाते तत्कृते प्रयत्नं विधातुं सर्वान् उपस्थितान् प्रैरयत्। राष्ट्रियसंस्कृतसंस्थानस्य कुलसचिवः आचार्यः के.बी.सुब्बरायुडुः धन्यवादवचांसि समार्पयत्। ततः राष्ट्रगानेन कार्यक्रमोऽयं सम्पूर्तिं यातः। मञ्चसञ्चालनम् आचार्येण रमेशकुमारपाण्डेयेन विहितम्।

१४.०८.२०११ दिनाङ्के कश्चन विलक्षण एव कार्यक्रमः 'संस्थानस्य लब्धराष्ट्रपतिसम्मानविदुषां शास्त्रचूडामणिविदुषाञ्च सम्मेलन'मिति नाम्ना समायोज्यत। सम्मेलनस्यास्य विषयस्तावदासीत् 'संस्कृतशास्त्रपरम्परा - नूतनसम्भावनाः'। संस्थान-कुलपतेराध्यक्ष्ये प्रवृत्तेऽस्मिन् सम्मेलने आचार्यः गयाचरणत्रिपाठी उपोद्घात-भाषणमकरोत्। संस्कृतपरम्पराया विस्तृतिं विवृण्वन् सः अस्याः परम्परायाः क्षीणतायां दुःखं प्रकटितवान्। शैव-शाक्त-बौद्धानां महतीं परम्परां विवृण्वन् सः तासां तासां परम्पराणाम् अनुसन्धानस्यावश्यकतां प्राकटयत्। संस्कृतपरम्पराणां प्रायशः ४० लक्ष अप्रकाशितपाण्डुलिपीनां ताम्रपत्राणां च शोध-प्रकाशनयोः आवश्यकता सः सुतरां स्यादिति अकथयत्। तदनन्तरं डा. उमारमणझा- डा. विश्वमूर्तिशास्त्रि- डा. वाचस्पतिशर्म- डा. रमाकान्तशुक्ल- डा. नरसिंह्याचार्य- डा. विद्याशङ्करत्रिपाठि- डा.सङ्घसेनसिंह- डा. हरिदत्तशर्म-डा. राजेन्द्रमिश्र-प्रभृतयो विद्वांसः स्वीयाभिप्रायं प्राकटयन्। चर्चायामस्यां प्रामुख्येन संस्कृतशास्त्रेषु कालानुसारं परिस्थित्यनुसारं च परिष्कारः स्यात्, बौद्धविद्यायाः बौद्धसंस्कृतसाहित्यस्य च प्रकाशनं भवेत्, विज्ञानचिकित्सानुसन्धानपरकस्य नूतनशास्त्रपरकसाहित्यसर्जनं स्यादिति एतादृशाः विषयाः मानवीयाधिकाराणां परिप्रेक्ष्ये परामृष्टाः। सभाध्यक्षः संस्थानकुलपतिः शास्त्राणां वर्तमानकाले चरितार्थतां महिलाहितानां संरक्षणं चोद्दिश्य स्वीयमभिप्रायं प्राकटयत्।



ग्रन्थलोकार्पणावसरस्य किञ्चन दृश्यम्

१६.०८.२०११ दिनाङ्के संस्कृतसप्ताहसमारोहस्य सम्पूर्तिकार्यक्रमः समायोजितः। अस्मिन् कार्यक्रम एव संस्कृतसप्ताहसमारोहाङ्गतया आयोजितविद्यालयीयस्पर्धानां पुरस्कारप्रदानकार्यक्रमोऽपि संवृत्तः। कार्यक्रमेऽस्मिन् मुख्यातिथित्वेन पूर्वकेन्द्रीयमन्त्री डा. सरोजिनीमहिषी अध्यक्षत्वेन संस्थानकुलपतिः आचार्य राधावल्लभत्रिपाठी च सभां शोभितवन्तौ। कार्यक्रमारम्भे सुश्री मीनाक्षी मङ्गलाचरणत्वेन 'मधुराष्टकस्तोत्रम्' अगायत्। अत्र स्वागतवचांसि संस्थानकुलसचिवः आचार्यः के. बी. सुब्बरायुडुः प्रास्तौत्। अतिथिसत्कारानन्तरं डा. महिषी



संस्कृतदिवसकार्यक्रमे लोकार्पणावसरस्य किञ्चन दृश्यम्

संस्कृतस्य वैश्विकभाषात्वं, भारतीयबौद्धिकसम्पदः सदुपयोगं च स्यादिति आशयं प्रकटितवती। ततः वेदिकासीनैः विद्वद्भिः स्पर्धासु जेतृभ्यः पुरस्काराः प्रदत्ताः। 'संस्कृते उद्योगावसरस्य स्वर्णिमः कालोऽय'मिति विचारः आचार्यः राधावल्लभत्रिपाठी प्रस्तुतवान्। डा. रमाकान्तशुक्लप्रस्तुतेन 'भाति मे भारतम्' इति गीतेन डा. वाई. एस. रमेशेन प्रकटितकार्तज्ञ्यज्ञापनेन च संस्कृतसप्ताहोत्सवोऽयम् उत्साहपूर्वकं सम्पूर्तिं यातः।

## लोकार्पणम्

संस्कृतदिवसोत्सवे १३.०८.२०११ दिनाङ्के राष्ट्रियसंग्रहालये अधोलिखितग्रन्थानाम् लोकार्पणम् जातम्-

* प्रयागस्थ-गङ्गानाथझा-परिसरे राष्ट्रियपाण्डुलिपि-मिशनप्रवर्तितापाण्डुलिपिसांख्यिकीकरणप्रक्रिया

* ई-ग्रन्थाः –

१. भोपालपरिसरेण सम्पादितं **भामहकृतम् अलङ्कारसर्वस्वम्**

जयपुरपरिसरेण सम्पादिता ग्रन्थाः

२. **महाकविदण्डीप्रणीतं दशकुमारचरितम्**

३. **पतञ्जलिरचितं व्याकरणमहाभाष्यम्**

४. **सुबन्धुविरचिता वासवदत्ता**

५. **श्रीमदभिनवधर्मभूषणयतिविरचिता न्यायदीपिका**

* ग्रन्थाः

१. **स्मृतिसारः** – डा. उदयनाथझा

२. **काव्यकावेरी** – डा. परमानन्दझा

३. **आचार्यशान्तिदेवप्रणीतः बोधिचर्यावतारः** – (सम्पा.) प्रो. संघसेनसिंहः

४. **आधुनिक संस्कृत काव्य की परिक्रमा** – डा. मञ्जुलता शर्मा

५. **जगन्नाथसुभाषितम्** – डा. बनमालीबिश्वालः

६. **तारा-अरुन्धती** – (अनु.) डा. बनमालीबिश्वालः

७. **रूपकत्रयी** – डा. जतिनपण्ड्या

८. **व्युत्पत्तिवादः** (द्वितीयभागः) – प्रो. हरेरामत्रिपाठी

९. **संस्कृतसाहित्यस्य विकासे पूर्वोत्तरराज्यानां योगदानम्**

१०. **वैदिक देवता, उद्भव और विकास** – प्रो. गयाचरण त्रिपाठी

११. **YASHASTILAKA : Aspects of Jainism, Indian Thought and Culture** (Reprinted) - Krishna Kanta Handiqui

१२. **भज गोविन्दम्** (पुनर्मुद्रणम्) – एम्. एन्. कृष्णमणिः

१३. **संस्कृतवार्ता** (एकादशाङ्कः)

मु
ख्या
ल
य
वा
र्ता

## पूर्वोत्तरक्षेत्रे भारतीयबौद्धाध्ययनसभायाः वार्षिकं सम्मेलनम्



उद्घाटनावसरे वन्दनं कुर्वन्तः बौद्धभिक्षवः

नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य जम्मूविश्वविद्यालयस्थ-बौद्धाध्ययन-विभागीयायाः भारतीयबौद्धाध्ययनसभायाः च संयुक्ततत्त्वावधाने १६-१८ सितम्बर, २०११ मिते काले 'पूर्वोत्तरक्षेत्रे भारतीयबौद्धाध्ययनसभायाः एकादशं वार्षिकं सम्मेलनं' समायोजितमभवत्। १६.०९.२०११ दिनाङ्के प्रातः १०.३० वादने सिक्किमराज्यस्य राजधान्यां गेङ्गटोकनगर्यां तिब्बतीसामुदायिकभवने अस्य वार्षिकसम्मेलनस्य उद्घाटनकार्यक्रमः संवृत्तः। उद्घाटनकार्यक्रमेऽस्मिन् मुख्यातिथित्वेन सिक्किमशासनस्य मानवसंसाधनविकासविभागस्य शिक्षासचिवः श्री सी. एस. रावः, विशिष्टातिथित्वेन गेङ्गटोकस्थ-सिक्किमकेन्द्रीयविश्व-विद्यालयस्य कुलपतिः आचार्यः महेन्द्रलामा, सारस्वतातिथित्वेन नागपुरविश्वविद्यालयस्य पालिविभागाध्यक्षचरः आचार्यः भागचन्द्रजैनः अध्यक्षत्वेन नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः राधावल्लभत्रिपाठी, भारतीयबौद्धाध्ययनसभायाः अध्यक्षः आचार्यः सूर्यप्रकाशव्यासः सभाया एव सचिवः आचार्यः वैद्यनाथलाभश्च वेदिकाम् अलमकुर्वन्। कार्यक्रमारम्भे बौद्धभिक्षुशोधार्थिभिः विहितबुद्धवन्दनानन्तरम् अतिथिभिः दीपप्रज्ज्वालनपुरस्सरं पूजा-वन्दना विहिता। ततः भारतीयबौद्धाध्ययनसभासदस्यैः पुष्पगुच्छशाल-अशोकस्तम्भस्मृतिचिह्नादिभिः अतिथिनां स्वागतं व्याहृतम्। आचार्यवैद्यनाथलाभः सभायाः स्थापनायाः इतिहासस्य च विषये स्वीयाभिप्रायं प्रकटितवान्। उपोद्घातभाषणं भारतीयबौद्धाध्ययनसभायाः महासचिवेन आचार्येण धर्मचन्द्रजैनेन समुपस्थापितम्। विशिष्टातिथिना गेङ्गटोकस्थ-सिक्किमकेन्द्रीयविश्वविद्यालयस्य कुलपतिना आचार्येण महेन्द्रलामामहोदयेन




बौद्धसम्मेलनोद्घाटनावसरस्य किञ्चन दृश्यम्

गदितं यत् 'वैश्विकपरिदृश्ये अस्माभिः बुद्धसिद्धान्तानां प्रचारः विधियते।' ततश्च सभाध्यक्षः नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः राधावल्लभत्रिपाठी प्रत्यपादयत् यत् 'बौद्धधर्मस्य प्रचारावसरे मूलसिद्धान्ताः अपि अवधेयाः, केवलं व्यावहारिकधर्मस्य प्रचारः न स्यात्।' अवसरेऽस्मिन् 'द ओसन् आफ बुद्धिष्ट विजडम', बौद्ध प्रज्ञा सिन्धु' 'शोधसारसंक्षेपः' च लोकायार्पिताः अभूवन्। अस्मिन्नेव अवसरे भारतीयबौद्धाध्ययन-सभापक्षतः आचार्यदीपकबरुआं पालिभाषासाहित्ययोः विशिष्टसेवायै मञ्जुश्रीसम्मानः कमलादेवीजैनस्मृतिसम्मानश्च प्रदत्तः।

तदनु विविधसत्रेषु प्रतिभागिभिः स्वीयविचाराः उपस्थापिताः शोधपत्राणि च पठितानि। सत्रानुसारं विषयस्य सत्राध्यक्षस्य च नामानि इत्थं वर्तन्ते –

**दिनाङ्कः – १६.०९.२०११**

प्रथमसत्रं **पालिभाषा साहित्यञ्च** (आचार्यः अङ्गराजचौधरी), द्वितीयसत्रं **पालिभाषा साहित्यञ्च** (आचार्यः ब्रह्मदेवनारायणशर्मा), **विशिष्टव्याख्यानम्** आचार्यः के. टी. एस. सराओ।

**दिनाङ्कः – १७.०९.२०११**

प्रथमसत्रं बौद्धसंस्कृतभाषा साहित्यञ्च (आचार्यः भागचन्द्रजैनः), द्वितीयसत्रं बौद्धसंस्कृतभाषा साहित्यञ्च (आचार्यः वी. वी. एस. साईबाबा), तृतीयसत्रं बौद्धधर्मस्येतिहासः – भारते विदेशेषु च (आचार्यः श्रीकान्तडबाढे), चतुर्थसत्रं बौद्धधर्मस्येतिहासः – भारते विदेशेषु च (डा. प्रोजीतकुमारपलितः), पञ्चमसत्रं भारते विदेशेषु च बौद्धधर्मस्येतिहासः अपभ्रंशसाहित्ये बौद्धधर्मः च (आचार्यः एस. के. पाठकः), षष्ठसत्रं भारते विदेशेषु च बौद्धधर्मस्येतिहासः अपभ्रंशसाहित्ये बौद्धधर्मः (डा. दीनानाथशर्मा)।




बौद्धसम्मेलनसमापनावसरस्य किञ्चन दृश्यम्

**दिनाङ्कः – १८.०९.२०११**

प्रथमसत्रं बौद्धदर्शनम् (आचार्यः उमाशङ्करव्यासः), द्वितीयसत्रं बौद्धदर्शनम् (आचार्यः एस. पी. व्यासः), तृतीयसत्रं समकालीनव्यावहारिकः प्रवृत्तो वा बौद्धधर्मः (आचार्यः अमरजीवलोचनः), चतुर्थसत्रं समकालीनव्यावहारिकः प्रवृत्तो वा बौद्धधर्मः (आचार्यः टी. एन. सतीशन्), पञ्चमसत्रं बौद्धधर्मस्य तुलनात्मकमध्ययनम् (आचार्यः राजकुमारीसिह्वा), षष्ठसत्रं समकालीनव्यावहारिकः प्रवृत्तो वा बौद्धधर्मः बौद्धपर्यटनं च (डा. रविभूषणकुमारः)।

१८.०९.२०११ दिनाङ्के अपराह्णे ३.३० वादने गेङ्गटोकनगरे चिन्तनभवनप्रेक्षागृहे अस्य सम्मेलनस्य सम्पूर्तिसमारोहः सम्पन्नतां यातः। अस्मिन् समारोहे सिक्किमशासनस्य मानवसंसाधनविकासविभागस्य मन्त्री श्रीनरेन्द्रकुमारप्रधानः मुख्यातिथिरूपेण, नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य कुलसचिवः आचार्यः के. बी. सुब्बरायुडु सारस्वतातिथिरूपेण अध्यक्षत्वेन भारतीयबौद्धाध्ययनसभायाः उपाध्यक्षः आचार्यः अविनाशकुमारश्रीवास्तवश्च समुपस्थिताः आसन्। अवसरेऽस्मिन् सम्मेलने जातस्य इतिवृत्तस्य विषये चर्चा प्रचलिता। भारतीयबौद्धाध्ययनसभया प्रदीयमानानां पुरस्काराणां च घोषणा सम्पूर्तिसमारोहावसरे जाता। वर्षेऽस्मिन् डा. रजनीशशुक्लाय बौद्धपरम्परासन्दर्भे अपभ्रंशभाषासाहित्ये श्रेष्ठशोधपत्रप्रस्तुत्यर्थम् आदिकविस्वयंभूसम्मानः बौद्धदर्शने सुश्रीये जैनश्वेतायै आचार्यबुद्धघोषसम्मानः च प्रदत्तः। कार्यक्रमस्य संयोजनम् आचार्यवैद्यनाथलाभः डा. शुक्लामुखर्जी च अकुरुताम्।

**यादृशैः सन्निविशते यादृशांश्चोपसेवते।**
**यादृगिच्छेच्च भवितुं तादृग् भवति पुरुषः।। –विदुर. ४.१३**

मनुष्य जैसों के साथ उठता-बैठता है, जैसों की सेवा करता है और जैसा बनना चाहता है वैसा ही बन जाता है।

# युवमहोत्सवः

मुख्यालयवार्ता

राष्ट्रियसंस्कृतसंस्थानस्य जम्मूस्थ-कोटभलवाले श्रीरणवीरपरिसरे २१.०९.२०११ तः २४.०९.२०११ दिनाङ्कं यावत् चतुर्थः युवमहोत्सवः अत्यन्तं भव्यरूपेण समाचरितः। विश्वस्मिन्नपि विश्वे जम्मू-कश्मीरसौन्दर्यं प्रसिद्धं वर्तते। तादृशे प्राकृतिकसौन्दर्ययुते जम्मू-कश्मीरप्रदेशे ऐषमः युवमहोत्सवः नितान्तं प्रमोदाय अकल्पत। संस्थानस्य विविधराज्यस्थितपरिसरेभ्यः प्रतिभागिनः अत्र शैक्षिक-कला-क्रीडास्पर्धासु भागमवहन्।

२१.०९.२०११ दिनाङ्के सायङ्काले उद्घाटनसमारोहाङ्गतया युवमहोत्सवस्यास्य काचित् अत्यन्तं चित्तमोहिनी शोभायात्रा प्रचलिता। ततः ध्वजारोहणं सम्पन्नम्। उद्घाटनसमारोहे मुख्यातिथिरूपेण जम्मू-कश्मीरराज्यस्य राजस्व-संरक्षण-पुनर्वासमन्त्री श्रीरमणभल्लामहोदयः, आमन्त्रितातिथिरूपेण भारतशासनमानवसंसाधनविकासमन्त्रालयस्य अवरसचिवः श्रीपवनमेहता, विशिष्टातिथिरूपेण वाराणसीस्थ-सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिचरः आचार्यः अभिराजराजेन्द्रमिश्रः अध्यक्षरूपेण नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः राधावल्लभत्रिपाठी वेदिकासीनाः आसन्। कार्यक्रममध्ये विविधपरिसरीयानां छात्राणां संस्कृतसंघनृत्यस्पर्धा प्रेक्षकानां मनस्सु आनन्दं समुत्पादत्।



२२.०९.११ दिनाङ्के प्रातः एव विविधस्पर्धा समारब्धाः। ताश्च स्पर्धा यथाक्रमं २४.०९.२०११ दिनाङ्कान्तं प्रचलिता। २४.०९.२०११ दिनाङ्के सायङ्काले अस्य युवमहोत्सवस्य समापनसमारोहः पुरस्कारवितरणकार्यक्रमश्च संवृत्तः। अस्मिन् कार्यक्रमे मुख्यातिथित्वेन जम्मू-कश्मीरराज्यस्य चिकित्सा-तकनीकी-क्रीडा-युवसेवामन्त्री श्री आर. एस. चिब महोदयः, विशिष्टातिथित्वेन जयपुरस्थ-जगद्गुरुरामानन्दाचार्यसंस्कृतविश्वविद्यालयस्य कुलपतिः आचार्यः रामानुजदेवनाथः, अध्यक्षत्वेन नवदेहलीस्थ-राष्ट्रियसंस्कृत-संस्थानस्य कुलपतिः आचार्यः राधावल्लभत्रिपाठी सभां शोभितवन्तः। अस्य चतुर्थयुवमहोत्सवस्य मुख्यरूपेण संयोजनं जम्मूस्थ-श्रीरणबीरपरिसरस्य प्राचार्यः आचार्यः विश्वमूर्तिशास्त्री अकरोत्। आचार्यः एम. चन्द्रशेखरः डा. शुक्ला मुखर्जी च कार्यक्रमसमन्वयकत्वेन आस्ताम्। नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य कुलसचिवः आचार्यः के. बी. सुब्बरायुडुः संरक्षकस्सन् विविधव्यवस्थासु सहकारं विहितवान्। स्पर्धानां सञ्चालनं डा. रत्नमोहनझाः अकरोत्।

चतुर्थेऽस्मिन् युवमहोत्सवे प्रथम-द्वितीय-तृतीयक्रमेण पुरस्कारभाजां नामानि-

**क. शैक्षिकस्पर्धा**

१. **संस्कृतसुभाषितकण्ठपाठः** - सुब्रह्मण्यमशास्त्री, आशा ई., सौदामिनी
२. **वादविवादस्पर्धा** - (पक्षे) मधुसूदनशर्म-कुलदीपभट्टौ, सौम्यरञ्जनसारङ्गी, अमितशुक्लः
(विपक्षे) नवीनभट्टः, जगन्नाथस्वाईं, प्रीति गर्ग
३. **स्फूर्तिस्पर्धा** - चन्दनकुमारः, सर्वेशपाठकः, भूपेन्द्ररावतः
४. **साहित्यरचना** - नवीनभट्टः, सुखदेवशर्मा, विनोद वी.डी.
५. **सङ्गणकीयसंस्कृतस्पर्धा** - हेमन्तसिंहयादवः, कुलदीपभट्टः, प्रज्ञा

**ख. चित्रस्पर्धा**

१. **आशुचित्रणम्**- नर्मदा एम.एम.,ज्योतिरञ्जननन्दा, विनय एच.वी.
२. **व्यङ्ग्यचित्रम्** - यदुकृष्णन् एन.आर., मुरलीमाधवः, मानस रञ्जन साहू
३. **भित्तिपत्रकम्** - श्रुति के.बी., ज्योति रञ्जन नन्दा, मानस रञ्जन साहू
४. **रङ्गवल्ली** - जागृति पाठक, ज्योत्स्ना डे, नम्रताठक्कर

**ग. सांस्कृतिकस्पर्धा**

१. **एककसंस्कृतगीतम्** - भावना, वागीशकुमारः, अन्तिमबालाजैन
२. **एककशास्त्रीयगायनम्** - विनय जी. भट्टः, भरतहादिकरः, श्रीदेवी एम.वी.
३. **एककशास्त्रीयवादनम्** - विनयकिरण, अभिशेखरशर्मा, रजनीकान्तत्रिपाठी
४. **एककशास्त्रीयनृत्यम्** - लक्ष्मीनारायणजैनः, प्रतीक्षा के.पी., भाग्यश्री (विशेषपुरस्कारः - नीतू टी.सी.)
५. **एकपात्राभिनयः** - पुरुषोत्तमदासः, कलाधरभट्टः, निपिन यू.
६. **सङ्घनृत्यम्** (Group Dance) (बालिकानां) - गुरुवायूरपरिसरः, जयपुरपरिसरः, श्रीरणवीरपरिसरः (विशेषपुरस्कारः) शृङ्गेरी-पुरीपरिसरौ

## घ. क्रीडास्पर्धा

१. **योगासनप्रदर्शनम्** (विविधपरिसरीयच्छात्राः) - विविधपरिसरीयच्छात्राः

२. **१०० मीटरधावनम्** (बालकानां) - विक्रमकिशनः, विजेन्द्रसिंहः, प्रियव्रतप्रधानः

३. **१०० मीटरधावनम्** (बालिकानां) - रञ्जनीभट्ट बी.एस., हिबा वी.आर., सरोजिनीतराई

४. **२०० मीटरधावनम्** (बालकानां) - भोपेन्द्रकुमारः, राजिन्द्रकुमारशर्मा, नवनीतकृष्णन्

५. **२०० मीटरधावनम्** (बालिकानां) - रञ्जनी भट्ट बी.एस., हिबा वी. आर., ज्योति सिंह

६. **४०० मीटरधावनम्** (बालकानां) - सन्दीपकुमारः, राजेन्द्रकुमारः, प्रियव्रतप्रधानः

७. **४०० मीटरधावनम्** (बालिकानां) - मीनागोस्वामी, ज्योतिसिंहः, लक्ष्मीप्रिया मानसिंह

८. **८०० मीटरधावनम्** (बालकानां)- सुशीलशर्मा, योगेशदाधीचः, शैतानरामः

९. **१५०० मीटरधावनम्** (बालकानां) - योगेशकुमारसहारनः, विक्रमः, योगेशदाधीचः

१०. **दीर्घकूर्दनम्** (Long Jump) (बालकानां) - भूपिन्द्रसिंहः, विक्रमकिशनः, सनातनओरमः

११. **दीर्घकूर्दनम्** (Long Jump) (बालिकानां)- रञ्जिनीभट्ट बी.एस., अञ्जलि एम., रेणुका

१२. **उच्चकूर्दनम्** (High Jump) (बालकानां) - निरञ्जनभट्टः, मनुनाथ के.भट्ट, रनीश सी.के.-रणवीरचौधरी

१३. **उच्चकूर्दनम्** (High Jump) (बालिकानां) - रञ्जिनीभट्ट बी.एस., बिन्या वी.बी., रेणुका

१४. **गोलकक्षेपणम्** (Shot put) (बालकानां)- शरतचन्द्रन् ई.सी., प्रवीणकुमारः, सन्दीपकुमारः

१५. **गोलकक्षेपणम्** (Shot put) (बालिकानां) - सरोजकुमारी, राजेश्वरीतमन्नाभट्ट, मनीषा

१६. **चक्रक्षेपणम्** (Discus throw) (बालकानां)- रणवीरचौधरी, प्रवीणकुमारः, दीपक एम.हेगडे.

१७. **चक्रक्षेपणम्** (Discus throw) (बालिकानां)- रेणुका, सरोजकुमारी, शिल्पाशर्मा

१८. **कुन्तक्षेपणम्** (Javaline throw) (बालकानां) - प्रदीपकुमारः, रनीश सी.के., शैतानरामः

१९. **बैडमिण्टन्** (Badminton single) (बालकानां) - कमलेशकुमारः, नवीनकुमारः

२०. **बैडमिण्टन्** (Badminton single)(बालिकानां) - राधा, शारदादेवी

२१. **बैडमिण्टन्** (Badminton double) (बालकानां) - सीजिल एन. एस. -रनीश सी. के., कमलेशकुमार-राहुलअवस्थिनौ

२२. **बैडमिण्टन्** (Badminton double) (बालिकानां) - राधा-सुषमे, शारदादेवी-कल्पनादेव्यौ

२३. **हस्तकन्दुकम्** (Volleyball) (बालकानां) -

**जम्मूपरिसरः** (प्र.) - कमलेशकुमारः (नायकः), मङ्गारामः, पङ्कजकुमारः, सन्दीपशर्मा, मङ्गतरामशर्मा, मयङ्कः, सञ्जीवकुमारः, राजेशशर्मा

**जयपुरपरिसरः** (द्वि.) - सोमेशकुमारशर्मा (नायकः), बोराल्करवीपुल अजीतकुमारः, अजीतकवठेकरः, राशुलजैनः, शेण्डगे प्रफुल्ल अभयः, कोरगये नरेन्द्रकुमारः, वीटल्कर भूषणविजयः, हर्षितजैनः

२४. **मल्लयुद्धम्** (Wrestling 50 kg) (बालकानां) - हरीशकुमारः, गणेशघुंघर्ड, अंकेशकुमार-मुनीशकुमारशर्माणौ



२५. **मल्लयुद्धम्** (Wrestling 55 kg) (बालकानां) - अजमेशः, सुमीतकुमारः, अजय-मुकेशकुमारौ

२६. **मल्लयुद्धम्** (Wrestling 60 kg) (बालकानां) - नरेन्द्रकुमारः, लीलाधरकुमारः, आकाशआर्य-राजिन्द्रसिंहौ



२७. **मल्लयुद्धम्** (Wrestling 66 kg) (बालकानां) - बलवानसिंहः, उमेशकुमारः, देवीन्द्रदूबे-सरवनकुमारः

२८. **मल्लयुद्धम्** (Wrestling 74 kg) (बालकानां) - कुलदीपकुमारः, सन्दीपकुमारः, सुनीलखजूरिया-हरीशकुमारौ



२९. **कबड्डी** (Kabaddi) (बालकानां) -

**जम्मूपरिसरः (प्र.)** - अनीलकुमारः, सत्यनारायणः, मुकेशकुमारः, राजेन्द्रशर्मा, अङ्केशकुमारः, नरेन्द्रकुमारः, बलवान् सिंहः, सुनीलखजुरिया

**जयपुरपरिसरः (द्वि.)** - अजीतकवठेकरः, हरीशकुमारः, सत्यवीरसिंहः, शैतानरामः, योगेशदाधीचः, भीमराजः, सोहनसिंहः, सुभाषकालिरावणः, राजेन्द्रकुमारः

३०. **चतुरङ्गम्** (Chess) (बालकानां) - मुरलीधरपालीवालः, गणेश एस. हेगडे, विजेन्द्रः

३१. **चतुरङ्गम्** (Chess) (बालिकानां) - पार्वती एम., पूनम जेना, शैवाली हेगडे

३२. **खो-खो** (बालिकानां) -

**शृङ्गेरीपरिसरः (प्र.)** - रञ्जिनीभट्टः बी. एस., राजेश्वरी तम्मन्ना भट्ट, तुषार के. हेगडे, मेघा एस. भट्ट, सुनीता भट्ट, आशागोपाल हेगडे, निकीता, विद्यावती विश्वनाथ भट्ट, उषा एल. हेगडे, श्रीवल्ली मञ्जुनाथहेगडे, कविता गणपतिभट्ट

**गरलीपरिसरः (द्वि.)** - मधुबाला, अरुणादेवी, सुप्रियाभारद्वाज, कविता, सुकन्यादेवी, अनुराधा, चम्पादेवी, पूजादेवी, भारतीकपूर, मीनाक्षीचौधरी, आरती, अञ्जना।

युवमहोत्सवे विभिन्नस्पर्धासु सर्वाधिकान् अङ्कान् प्राप्य प्रथम-द्वितीय-तृतीयस्थानभाजः परिसराः - १. श्रीराजीव-गान्धीपरिसरः, शृङ्गेरी (विजयवैजयन्ती), २. श्रीरणवीरपरिसरः, जम्मू-कश्मीरम्, ३. जयपुरपरिसरः, जयपुरम्।




विजयवैजयन्तीदलः

अभिनन्दनम्

मुख्यालयवार्ता

# अखिलभारतीयशास्त्रीयस्पर्धायोजनस्य स्वर्णजन्तीमहोत्सवः सम्पन्नः

संस्कृतशास्त्रपरम्परायाः संरक्षणाय, युवविद्वत्परम्परायाः संवर्धनाय प्रोत्साहनाय च राष्ट्रियसंस्कृतसंस्थानेन विविधेषु शास्त्रीयविषयेषु अखिलभारतीया स्पर्धा आयोज्यत इति विदितमेव समेषाम्। तादृशायोजनस्य पञ्चाशत्तमं वर्षमुपलक्ष्य ऐषमः नवम्बरमासस्य २६ तः २८ पर्यन्तं स्वर्णजयन्तीमहोत्सवः समाचरितः। गुजरातराज्ये अहमदाबादस्थ-छारोडीस्थिते 'दर्शनम्'- इत्याख्ये संस्कृतमहाविद्यालये अयं कार्यक्रमः भव्यतया सम्पन्नः। संस्कृतस्य, संस्कृतपरम्परायाः संस्कृतज्ञानां च विजयोऽस्त्विति शुभकामनासम्भरितैः निनादैः अनुरणितविद्वन्मण्डलमध्यतः वर्णरञ्जितवायुगोलकानाम् उड्डायनपुरस्सरं २६तमे दिनाङ्के प्रातः महोत्सवस्यास्य उपक्रमः कृतः। तदनु प.पू.सद्. शास्त्रिश्री-माधवप्रियदासस्वामिनां दिव्योपस्थितौ राष्ट्रियसंस्कृतसंस्थानस्य कुलपतेः आचार्यराधावल्लभत्रिपाठिवर्यस्य आध्यक्ष्ये च प्रवृत्ते उद्घाटनसत्रे राष्ट्रियसंस्कृतसंस्थानस्य संस्थापकनिदेशकः आचार्यः रामकरणशर्ममहाभागः सारस्वतातिथिरूपेण समुपस्थित आसीत्। गान्धीनगरस्थ-संस्कृताकादम्याः डॉ. हर्षदभाईत्रिवेदी, विद्वन्मूर्धन्यः डॉ. राजेन्द्रनाणावटी च विशिष्टतिथी आस्ताम्। अवसरेऽस्मिन् सद्.-पुराणीश्रीभक्तिप्रकाशदासजी-स्वामिनः, सद्. पुराणीश्रीबालकृष्णदासजी-स्वामिनः च मञ्चमलङ्कृत्य अन्वगृह्णन्। स्वामिनारायणसम्प्रदायस्य बहवः साधवः, निर्णायकाः, विद्वांसः, स्पर्धालवः अन्ये च सभामभूषयन्। आरम्भे वेदघोषेण, दीपप्रज्वालनेन, कुलगीतेन वैदिकराष्ट्रगीतोच्चारणपुरस्सरं शास्त्रीयध्वजोत्तोलनेन च मङ्गलमाचरितम्। 'दर्शनं' संस्कृतमहाविद्यालयस्य प्राचार्येण डॉ. रामप्रियमहाभागेन समेषां स्वागतं व्याहृतम्। हर्षदभाईत्रिवेदि-राजेन्द्रनाणावटीमहोदयौ कार्यक्रमस्य यशस्वितायै शुभाशयान् प्राकाशयताम्। अन्ताराष्ट्रियसंस्कृताध्ययनसमवायस्य अध्यक्षचरः आचार्यः रामकरणशर्मा संस्कृतस्य शास्त्रीयपरम्पराणां भव्यतां संस्मार्य तद्रक्षणाय सर्वैरपि अस्माभिः अविरतं यतनीयमिति उदबोधयत्। कुलपतिः राधावल्लभत्रिपाठिमहोदयः कार्यक्रमस्य उद्देश्यं विशदीकृत्य शास्त्रपरम्परायाः विकासाय करणीयान् क्रियमाणांश्च प्रयत्नान् उद्दिश्य व्यवृणोत्। प.पू.सद्- माधवप्रियदासजीस्वामिपादैः 'मानवीयमूल्यसंरक्षणस्य, जीवनस्य चिन्तनस्य च स्तरसंवर्धनस्य, भारतीयसंस्कृतिपरिरक्षणस्य च महदुत्तरदायित्वं संस्कृतज्ञानामस्ति' इति उदबोधयन्। अवसरेऽस्मिन् स्वामिनारायणविश्वविद्यापीठपक्षतः शलाकास्पर्धासु विजयिभ्यः प्रदेयाः स्वर्णशलाकाः सद्. पुराणी बालकृष्णदासस्वामिपादैः कुलपतिवर्यस्य करकमलयोः समर्पिताः। श्रीलक्ष्मीनारायणहृदयाख्यग्रन्थस्य पूजाविधियुतसंस्करणस्य लोकार्पणमपि अवसरेऽस्मिन् सञ्जातम्। संस्थानस्य कुलसचिवः आचार्यः के.बी. सुब्बरायुडु स्वर्णजयन्तीमहोत्सवस्य आयोजनमुद्दिश्य विवरणं प्रदाय कार्यक्रमे उपस्थितेभ्यः धन्यवादवचनानि न्यवेदयत्।



वायुगोलकानाम् उड्डायनं कुर्वद् विद्वन्मण्डलम्

उद्घाटनसत्रात् परं २८.११.११ दिनाङ्कं यावत् त्रिषु सभामण्डपेषु समकालं विविधाः शास्त्रीयस्पर्धाः समभवन्। एतासु स्पर्धासु १९ राज्येभ्यः राज्यस्तरीयस्पर्धासु चिताः २३८ स्पर्धालवः भागमगृह्णन्। अष्टसु शास्त्रीयविषयेषु भाषणस्पर्धाः, सप्तसु ग्रन्थेषु शलाकापरीक्षाः चतुर्षु विषयेषु कण्ठपाठस्पर्धाः, शास्त्रार्थविचारः, समस्यापूर्तिः अन्त्याक्षरी चेति आहत्य २२ स्पर्धाः अस्मिन् पर्याये समायोजिता आसन्। स्पर्धासु विजयिनः प्रथमद्वितीयतृतीयपुरस्कारभाजः क्रमशः स्वर्णपदकं, रजतपदकं, कांस्यपदकं च प्राप्नुवन्। पदकैः सह रू. ७०००/-, रू. ५०००/-, रू. ३०००/- इत्येवं धनराशिरपि पुरस्काररूपेण प्रथमादिस्थानभाग्भ्यः प्रदत्ताः। शलाकापरीक्षासु विशिष्टश्रेणीं/प्रथमश्रेणीं प्राप्तवद्भ्यः प्रोत्साहन-पुरस्काराः प्रादीयन्त। स्पर्धासु विजयं प्राप्तवत्यः महिलास्पर्धालवः स्वामिनारायणविश्वविद्याप्रतिष्ठानपक्षतः अतिरिक्तेन एकसहस्र-रुप्यकात्मकेन प्रोत्साहनराशिना सभाजिताः। सर्वेऽपि स्पर्धालवः, निर्णायकाः विद्वांसः, कार्यकर्तारश्च स्वामिपादैः आशीर्भिरनुगृहीताः। सर्वासु स्पर्धासु सर्वाधिकान् अङ्कान् प्राप्य विजयवैजयन्तीभाग् अभवत् कर्णाटकराज्यात् समागतः स्पर्धालुगणः। एतेन गणेन आहत्य एकादशस्वर्णपदकानि, पञ्च रजतपदकानि, त्रीणि कांस्यपदकानि च अर्जितानि। द्वितीयस्थाने गुजरात-स्पर्धालुदलम्, तृतीयस्थाने च राजस्थानस्पर्धालुगणः अभिनन्दनम् अलभताम्। सर्वे एते पुरस्काराः सम्पूर्तिसमारोहे प्रदत्ताः।




अखिलभारतीयशास्त्रीयस्पर्धायाः उद्घाटनकार्यक्रमस्य किञ्चन दृश्यम्

सम्पूर्तिसमारोहे भाषमाणः कुलपतिः राधावल्लभत्रिपाठिवर्यः पूर्वदिने चिन्तनगोष्ठ्यां विद्वद्भिः शास्त्रीयस्पर्धायोजनमुद्दिश्य प्रकटिताशयान् परामृश्य अग्रिमेषु वर्षेषु इदमायोजनम् उत्कृष्टतरं भवेदिति सदाशयं प्राकटयत्; तदर्थं विविधानुपायान् च प्रास्तुवत्। वेदकण्ठपाठायोजनम्, अन्ताराष्ट्रिययुवविद्वत्प्रोत्साहनाय स्पर्धायोजनं शलाकापरीक्षाविषयचयने स्पर्धालोः स्वातन्त्र्यम् इत्यादिविषयेषु पुनः विशेषज्ञानां समितौ विचार्य जनवरीमासे अग्रिमवर्षस्य नियमाः प्रकटयिष्यन्ते इति स उदघोषयत्। अवसरेऽस्मिन् सोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. पङ्कजभाई जानी, डॉ. वसन्त भाई, गौतमभाई पटेलः, डॉ. मणिभाईप्रजापतिः, शास्त्रिश्रीनरेन्द्रभाई इत्येते विद्वांसः विशिष्टातिथिरूपेण सभामन्वगृह्णन्। सद्स्वामिपादैः स्वीयाशीर्वचने 'प्राचीनाः सद्विद्याः आधुनिकपद्धत्याः सदुपयोगेन समुन्नेयाः' इति आशयः प्रकटितः।

## अखिलभारतीयशास्त्रीयस्पर्धासु विजयिनः

( प्रथम-द्वितीय-तृतीयक्रमेण )



### भाषणस्पर्धासु पुरस्कारभाजः

| | विजयिनां नामानि | संस्था |
|---|---|---|
| व्याकरणे | कु. अनुप्रिया त्रिपाठी | जयपुरपरिसरः |
| | प्रियङ्का तिवारी | लखनऊपरिसरः |
| | एस्. त्यागराजः | श्रीचन्द्रशेखर सं.वि.म.वि., काञ्चीपुरम् |
| साहित्ये | जोषी हार्दिकः जी | दर्शनम् सं.म.वि. |
| | केशवकिरणशर्मा | एस.एम.एस.पि.सं.महा.वि., उडुपी |
| | नरेशभट्टः | लखनऊपरिसरः |
| | उमाकान्तमहापात्रः | (प्रोत्साहनपुरस्कारः) |
| न्याये | आशुतोषानन्द-ब्रह्मचारी | दक्षिणामूर्तिसं.म.वि., वाराणसी |
| | त्रिवेदी भगीरथः आर्. | दर्शनम्-संस्कृतमहाविद्यालयः, छारोडी |
| | राघवेन्द्रः पि आरोळ्ळि, | शृङ्गेरीपरिसरः |
| सांख्ययोगे | गणपतिः वि. हेगडे | शृङ्गेरीपरिसरः |
| | आर्. भरणीधरः | श्रीचन्द्रशेखरेन्द्र सं.महा.वि काञ्चीपुरम् |
| | रावल-अङ्कितः | दर्शनम् सं. महा. वि. |
| मीमांसायां | साधु-मुनिवत्सलदासः | दर्शनम् सं.महा.वि. |
| | कृष्णमूर्तिभट्टः | शृङ्गेरीपरिसरः |
| | सुब्रतकुमारषडङ्गी | सदाशिवपरिसरः, पुरी |
| वेदान्ते | विश्वनाथ हेगडे | शृङ्गेरीपरिसरः |
| | धीरजकुमारपाण्डेयः | काशीहिन्दूवि.वि., वाराणसी |
| | जोषी चिन्तन डी. | दर्शनम् सं.म.वि. |
| धर्मशास्त्रे | कलाधरभट्टः | शृङ्गेरीपरिसरः |
| | एस.रमणः | मद्रपुरी सं.महा.वि. चेन्नई |
| | जोषीधरम | दर्शनम् सं.महा.वि. |
| ज्यौतिषे | पण्ड्या अजयः एल्. | दर्शनम् सं.महा.वि. |
| | कमलाकान्तः | शृङ्गेरीपरिसरः |
| | नीरजकुमारः | रा.सं. विद्यापीठम्, तिरुपतिः |

### शलाकापरीक्षासु पुरस्कारभाजः

| | | |
|---|---|---|
| साहित्ये | अनमोलशर्मा | जयपुरपरिसरः |
| व्याकरणे | भारती.एस्. | शृङ्गेरीपरिसरः |
| | सविता आर्या | आ.क.गुरुकुलम्, हरिद्वारम् |
| | आशीषवशिष्ठः | जयपुरपरिसरः |
| | श्यामसुन्दरः | लखनऊपरिसरः (विशिष्टपुरस्कारः) |
| न्याये | एल्. सौजन्यकुमारः | मद्रपुरीसं.महा., चेन्ने |
| | श्रीकान्तकरुसापुरः | पूर्णप्रज्ञ वि.पी.सं.वि., बेङ्गलूरु |
| | जानीस्वस्तिकः | दर्शनम् सं. महा., छारोडी |

| | | |
|---|---|---|
| सि. ज्यौतिषे | विजयानन्द अडिगः | एस्.एम्.एस्.पि. सं.महा. उडुपि |
| | विनोदकुमारशर्मा | जयपुरपरिसरः |
| | राजापाठकः | का.हिन्दू.वि.वि., वाराणसी |
| वेदान्ते | श्रीनिधिप्याटी | पूर्णप्रज्ञविद्यापीठम् |
| | हेमन्तसिंहयादवः | जयपुरपरिसरः |
| पुराणेतिहासे | वादिराजजम्बुखण्डि | पूर्णप्रज्ञविद्यापीठ-सं.महा.वि. बेङ्गलूरु |
| | रेणुशर्मा | जयपुरपरिसरः |
| | भट्टः जय | श्री.व.सं.महा.वि., सोला |
| | सत्यम् मिश्रः | लखनऊपरिसरः (विशिष्टपुरस्कारः) |
| मीमांसायां | सी. हरिहरः | मद्रपुरी सं.म.वि. चेन्नै |
| | प्रशान्तगांवकरः | शृङ्गेरीपरिसरः |

### कण्ठपाठे पुरस्कारभाजः

| | | |
|---|---|---|
| काव्ये | जी. शिवप्रसादभट्टः | एस.एम.एस.पी. महावि. उडुपि |
| | घनश्यामः | जयपुरपरिसरः |
| | सत्यकामः | आर्षज्योतिर्मठ-गुरुकुलम् देहरादून |
| | भास्करकाण्डपालः | (प्रोत्साहनपुरस्कारः) |
| अमरकोषे | रश्मिः | कन्यागुरुकुलम्, चोटीपुरा, मुरादाबाद |
| | जानीमयूरः | श्री.व.सं.म.वि. सोला |
| | सुबोधकुमारपाण्डेयः | के.जे.सो.वि., मुम्बई |
| अष्टाध्याय्यां | अमरनाथः | शृङ्गेरीपरिसरः |
| | माधुरी आर्या | आर्यकन्यागुरुकुलम्, शिवगञ्ज, सिरोही |
| | मुकेश आर्यः | लखनऊपरिसरः |
| धातुरूपे | रामाकुमारी आर्या | आर्यकन्यागुरुकुलम्, शिवगञ्ज, सिरोही |
| | पुरूषोत्तमदासः | जम्मूपरिसरः |
| | शीलुगौतमः | श्री. षा.सं.महा.वि. पोरबन्दर |
| शास्त्रार्थे | शीलुभरतभाई अमृतलालः | श्रीसो.सं.वि.वि., वेरावलम् |
| | एन्. वैद्य सुब्रह्मण्यम् | श्रीसो.सं.वि. वि. वेरावलम् |
| | प्रमोदभट्टः | शृङ्गेरीपरिसरः |
| समस्यापूर्तौ | भारती एस्. | शृङ्गेरीपरिसरः |
| | एस्. त्यागराजः | श्रीचन्द्रशेखरेन्द्र सं. वि.म.वि., काञ्ची |
| | विश्वनाथहेगडे | शृङ्गेरीपरिसरः |
| अन्त्याक्षर्यां | श्रीश अडिगः | एस्.एम्.एस्.पी. सं. महा. पाशा. उडुपि |
| | सुशान्तशर्मा | जम्मूपरिसरः |
| | लगधिरनितेश आर् | श्रीबाबडेश्वरसं.म., गुजरात |

अभिवर्धन्ताम्

सम्पूर्तिसमारोहारम्भे कुलसचिवः के.बी. सुब्बरायुडु स्वागतभाषणमकार्षीत्, अन्ते 'दर्शनम्'-संस्कृतमहाविद्यालयप्राचार्यः डॉ. रामप्रियः वन्दनं समार्पयत्। दिनत्रयं यावत् विविधस्पर्धासत्राणि सञ्चालयितुं संस्थानात् मुक्तस्वाध्यायपीठस्य निदेशकः डॉ. वाई. एस्. रमेशः, मु. स्वा. पीठस्य सहायककुलसचिवः (प्र.), डॉ. रत्नमोहनझाः, मु. स्वा. पीठस्य सहायकाचार्यः डॉ. त. महेन्द्रः, डॉ. नोदनाथमिश्रः च समुपस्थिताः। श्री कू. वेङ्कटेशमूर्तिः कार्यक्रमं संयोजितवान्।



कार्यक्रममवलोकयन्तः सुधियः




अखिलभारतीयशास्त्रीयस्पर्धायाः समापनावसरस्य किञ्चन दृश्यम्



विजयवैजयन्तीं स्वीकुर्वन् विजयी कर्णाटकस्पर्धालुगणः




## संस्कृतगौरवदिवसः

उज्जयिनीस्थ-कालिदाससंस्कृताकादमी (मध्यप्रदेशसंस्कृतिपरिषद्) द्वारा नवदेहलीस्थराष्ट्रियसंस्कृतसंस्थान-विदिशास्थ पं. गङ्गाप्रसादपाठकललितकलान्यासयोः मिथः सहयोगेन ०७-०८.०८.२०११ मिते काले मध्यप्रदेशे विदिशास्थ-जालौरीगार्डन्स्थाने 'संस्कृतगौरवदिवसमहोत्सव'ाख्यः कश्चन विशिष्ट एव कार्यक्रमः समायोज्यत।

०८.०८.२०११ दिनाङ्के शोधगोष्ठ्यां विचारितौ विषयौ आस्तां तावत्- १. दैनन्दिनजीवने योगदर्शनस्य उपयोगिता, २. सामाजिकक्षेत्रे योगदर्शनस्य महत्त्वं (पातञ्जलयोगदर्शनसन्दर्भे) चेति। एतौ विषयावपि विद्वद्भिः विमृष्टौ। तदनु सायं ४.०० वादने पुरस्कारप्रदानकार्यक्रमः सम्पूर्तिसमारोहश्च सम्पन्नः।

## मुक्तस्वाध्यायपीठेन आयोजिता कार्यशाला

राष्ट्रियसंस्कृतसंस्थानस्य मुक्तस्वाध्यायपीठेन संस्कृत-हिन्दीभाषानुवादशिक्षणप्रमाणपत्रपाठ्यक्रमस्य (Certificate Course in Sanskrit Hindi Language Translation) सञ्चालनार्थं अपेक्षितपाठ्यसामग्र्याः संरचनार्थं २६-३०.०७.११ इत्यवधौ पञ्चदिवसीया कार्यशाला संस्थानमुख्यालये समायोज्यत। २६.०७.२०११ दिनाङ्के प्रवृत्ते उद्घाटनसत्रे भाषमाणः मुक्तस्वाध्यायपीठनिदेशकः डा. वाई. एस. रमेशः पाठ्यक्रमस्य परिचयप्रदानपुरस्सरं साम्प्रतिके काले संस्कृत-हिन्दीभाषयोरनुवादस्य आवश्यकतां प्रतिपाद्य, पाठ्यक्रमेणानेन संस्कृतक्षेत्रे प्रतिदिनं प्रवर्धमानायाः निरुद्योगसमस्यायाः समाधानमपि भविष्यतीति न्यरूपयत्। पाठ्यक्रमसंयोजकः डा. तङ्गल्लपल्लि महेन्द्रः पाठ्यक्रमस्यास्य लक्ष्यं प्रस्तुत्य कार्यशालायां करणीयं कार्यं न्यवेदयत्। कार्यशालायाः मार्गदर्शकत्वेन समुपस्थितः डा. रमाकान्तशुक्लः विश्वस्य प्राचीनतमायाः संस्कृतभाषायाः राष्ट्रभाषा-हिन्द्याश्च पारस्परिकसंवादार्थं साम्प्रतिकेऽनेहसि अनुवादस्य प्रासङ्गिकतां सविशेषम् उदबोधयत्। कार्यशालायामस्यां डा. सतीशकपूर (जम्मू)- डा. श्रीप्रकाशपाण्डेय (मुजफ्फरपुर)-डा. लक्ष्मीनिवासपाण्डेय (लखनऊ)-डा. देवदत्तसरोदे (मुम्बई)- श्रीमती शशिप्रभा गोयल (देहली)-डा. सत्यपालशर्म (करनाल)-डा. श्रेयांसकुमारद्विवेदिनः (गुरुग्राम) भागमगृह्णन्। अस्मिन्नवसरे दूरस्थशिक्षामाध्यमेन पाठसंरचना पाठलेखनञ्च कथं स्यादिति डा. रत्नमोहनझाः व्यावृणोत्। अवसरेऽस्मिन् मुक्तस्वाध्यायपीठसदस्याः डा. जयप्रकाशनारायण-श्री कू. वेङ्कटेशमूर्ति-डा. अजयकुमारमिश्र-डा. सुनीता गुप्त-डा. प्रफुल्लगडपालाश्च समुपस्थिताः आसन्।



कार्यशालायां विचारयन्तः विद्वांसः

उद्घाटनसत्रानन्तरं पाठ्यक्रमस्य निर्धारणं कृतम्। तदाधारेण संरचनीयानां विंशतिपाठानां सूची सज्जीकृता। निष्पादनीयपाठानां पाठसंरचना डा. सतीशकपूरेण व्यधायि। कार्यशालायाः द्वितीयदिनादारभ्य पञ्चमदिनं यावत् प्रत्येकं विदुषा एकैकं पाठः लिखितः। तत्तल्लेखकेन लिखितस्य पाठस्य समीक्षणं संशोधनञ्च डा. रमाकान्तशुक्लवर्येण अकारि।

कार्यशालायाः समाप्तिः ३०.०७.२०११ दिनाङ्के सायं ४.०० वादने जाता। अस्मिन्नवसरे समुपस्थितः संस्थानकुलसचिवः आचार्यः के. बी. सुब्बरायुडुः समागतान् विदुषः समुत्प्रैरयत् यत्पाठ्यक्रमे अवशिष्टान् अन्यान् पाठान् अपि शीघ्रतया सम्पाद्य प्रेषयेयुरिति। कार्यशालायाः प्रतिवेदनं पाठ्यक्रमसंयोजकः डा. त. महेन्द्रः प्रास्तौत्। कार्यशालायां समुपस्थितेभ्यः विद्वद्भ्यः धन्यवादान् डा. रत्नमोहनझा प्राकटयत्।



हिन्दीपक्षोत्सवाङ्गतया आयोजितायाः काव्यसन्ध्यायाः किञ्चन दृश्यम्

## हिन्दीपक्षोत्सवः

हिन्दीभाषायाः व्यापकं प्रचार-प्रसारं स्यादिति उद्देश्येन भारतशासनेन प्रतिवर्षं हिन्दीपक्षोत्सवः आचर्यते। एतस्य उत्सवस्य केन्द्रीयभूतः कार्यक्रमः १४ सितम्बरे हिन्दीदिवसत्वेन पर्यपाल्यते। प्रतिवर्षानुसारं राष्ट्रियसंस्कृतसंस्थानेन हिन्दीदिवसः ऐषमः १४.०९.२०११ दिनाङ्के सम्मेलनप्रकोष्ठे महता वैभवेन समाचरितः। संस्थानकुलपतेः आचार्यराधावल्लभत्रिपाठिनः आध्यक्ष्ये सम्पन्नेऽस्मिन् काव्यसन्ध्याकार्यक्रमे हिन्द्याः प्रसिद्धसाहित्यकारः कविश्च डा. कैलाशवाजपेयी, आचार्यः 'अभिराज'राजेन्द्रमिश्रः, आचार्यः रमाकान्तशुक्लः, आचार्यः इच्छारामद्विवेदी, डा. अनामिका च समुपस्थाय स्वीयकाव्यपाठं प्रास्तुवन्।

अस्मिन् पर्याये संस्थानसदस्यानां हिन्दीस्पर्धासु प्रदर्शनं गुणात्मकदृष्ट्या उत्तममासीत्।




हिन्दीपक्षस्य समापनकार्यक्रमस्य किञ्चन दृश्यम्

### समायोक्ष्यते कौमुदीमहोत्सवः

राष्ट्रियसंस्कृतसंस्थानेन अन्तःपरिसरीय-नाट्यस्पर्धा 'कौमुदीमहोत्सवः' ३०.०१.२०१२ तः ०२.०२.२०१२ दिनाङ्कं यावत् नवदेहलीस्थ-लिटिल् थियेटर ग्रुप इत्यस्मिन् स्थाने आयोक्ष्यते।

## प्रवर्तन्ते आभारतम् अनौपचारिकसंस्कृतशिक्षणकेन्द्राणि

राष्ट्रियसंस्कृतसंस्थाने २०११-१२ वर्षस्य कृते समस्तभारते अनौपचारिकसंस्कृतकेन्द्राणि (Centres for Non Formal Sanskrit Education) सञ्चाल्यन्ते। अनौपचारिकसंस्कृतशिक्षणकेन्द्रेषु संस्कृतं पिपठीषु छात्राः, अध्यापकाः, कर्मचारिणः, कृषकाः, गृहिण्यः व्यवसायिनः चेत्यादयो भवन्ति। २०११-१२ तमे वर्षे राष्ट्रे अनौपचारिकशिक्षणकेन्द्राणां संख्या १६०० केन्द्राणि वर्तते, सा च अधोनिर्दिश्यते-

| | | | | | |
|---|---|---|---|---|---|
| आन्ध्रप्रदेश | - | २५ | बिहार+झारखण्ड | - | ३० |
| दिल्ली | - | १५ | गुजरात | - | २५ |
| हरियाणा | - | २० | हिमाचलप्रदेश | - | २० |
| जम्मू-कश्मीर | - | १५ | कर्णाटक | - | ४५ |
| केरल | - | ३० | महाराष्ट्र+गोवा | - | १५ |
| मध्यप्रदेश+छत्तीसगढ | - | ५५ | उडीसा | - | ४५ |
| पञ्जाब | - | २० | राजस्थान | - | ४० |
| तमिलनाडु | - | १० | उत्तराखण्ड | - | २० |
| उत्तरप्रदेश | - | १२५ | पश्चिमबङ्ग | - | ४५ |
| पूर्वोत्तरराज्यानि | - | २०० | | | |

**आहत्य केन्द्रसंख्या - ८००x२ (चक्रद्वयम्) = १६००**




**अनौपचारिकसंस्कृतशिक्षणकेन्द्राणां कानिचन दृश्यानि**

## चतुर्दिवसीयः जयदेवसमारोहः सोल्लासं सम्पन्नः

गीतगोविन्द-रचयितुः संस्कृतगीतिकाव्यप्रवर्तकस्य श्रीजयदेवस्य जयन्तीसमारोहः उत्कलेषु महता समारोहेण भुवनेश्वरस्य जयदेवभवने, उत्कलविश्वविद्यालयस्य संस्कृतविभागे, केन्दुविल्वग्रामे च पर्यायक्रमेण २३.०९.११ तः २६.०९.११ पर्यन्तं लोकभाषाप्रचारसमितिपक्षतः राष्ट्रियसंस्कृतसंस्थानस्य सहयोगेन समायोजितः।



जयदेवसमारोहस्य उद्घाटनमहोत्सवस्य किञ्चन दृश्यम्



जयदेवसमारोहस्य किञ्चन दृश्यम्

## प्रवृत्ता शोधप्रविधि-पाण्डुलिपिविज्ञानकार्यशाला

०७.०७.२०११ दिनाङ्के जयपुरपरिसरे एकविंशतिदिनात्मिकायाः शोधप्रविधि-पाण्डुलिपिविज्ञानकार्यशाला आयोजिता। कार्यशालायामस्यां भारतस्य प्रसिद्धाः विद्वांसः स्वकीयानि व्याख्यानानि प्रास्तुवन्। तेषु प्रो. राधावल्लभत्रिपाठी, प्रो. रामानुजदेवनाथः, प्रो. अभिराजराजेन्द्रमिश्रः, देवर्षिकलानाथशास्त्री, प्रो. अर्कनाथचौधरी, प्रो. टि.एन्. गञ्जू, प्रो. दीक्षितपुष्पा, प्रो. वि.एन्. झाः, प्रो. राजेन्द्रनानावटी, प्रो. वासुदेवशर्मा, प्रो. भगवतीसुदेशः, प्रो, सुदेशकुमारशर्मा, प्रो. एस्.पि. नारंगः, प्रो. रहसबिहारीद्विवेदी, प्रो. सुरेश्वरझाः, प्रो. सन्तोषमित्तलः, प्रो. शर्मिलाबागची, प्रो. श्रीयांशकुमारसिंघई, प्रो. के.पि. केशवन्, प्रो. शशिनाथझाः, प्रो. प्रभुनाथद्विवेदी, प्रो. राजेश्वरमिश्रः, प्रो. सोहनलालपाण्डेयः, प्रो. विश्वकर्मा, प्रो. शिवकान्तझाः, डा. वाई.एस्. रमेशः, डा. कमलचन्द्रयोगी, डा. रामकुमारशर्मा, डा. कृष्णकुमारः, डा. रमाकान्तपाण्डेयः, डा. अवधेशकुमारकौशिकः, डा. अनिलगौतमः, श्रीशशिकुमारः, श्रीमती नमितामित्तल, श्रीमोहितझालानी, श्रीप्रदीपमिश्रः आसन्।

कार्यशालायाः अस्याः समापनसमारोहः ०२.०८.२०११ दिनाङ्के अभवत्।

## बालनाट्यमहोत्सवः आयोजितः

मध्यप्रदेशसंस्कृतिपरिषदः कालिदाससंस्कृताकादम्या भारतशासन-मानवसंसाधनविकासमन्त्रालयस्य नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य सहयोगेन "डा. शिवमङ्गलसिंह'सुमन'-स्मृतिबालनाट्यमहोत्सवः" ०४.०८.२०११ तः ०६.०८.२०११ दिनाङ्कं यावत् उज्जयिन्याम् आयोजितः। पारम्परिकरङ्गकर्म प्रति तरुणान् आकृष्टुं तेषु उत्तमसंस्कारान् पोषयितुं च कालिदाससंस्कृताकादम्या "डा. शिवमङ्गलसिंह'सुमन' स्मृति-बालनाट्यमहोत्सवः" समारब्धः। अस्य महोत्सवस्य उद्घाटनावसरे ०४.०८.२०११ दिनाङ्के मुख्यातिथित्वेन श्रीकमलपटेलः (विधायकः, हरदाखिरकिया-विधानसभाक्षेत्रं) विशिष्टातिथित्वेन श्रीहेमन्तटाले (अध्यक्षः नगरपालिका हरदा) अध्यक्षत्वेन हरदाजिलाधीशः श्रीसुदामखाडे च समुपस्थिताः आसन्।

अत्र कार्यक्रमा इत्थं प्रदर्शिताः -

०४.०८.२०११ **दूतवाक्यम्** (निदे. सञ्जयतेनगुनिया, इन्टेलेक्चुअल पब्लिक वेलफेयर एण्ड ट्रेनिंग फार आर्ट सोसायटी, हरदा)

०५.०८.२०११ **दूतघटोत्कचम्** (निदे. सञ्जयश्रोत्रियः, भारतीय-जननाट्यसंघः, होशंगाबाद्

०६.०८.२०११ **मध्यमव्यायोगः** (निदे. प्रशान्तलोवंशी, नटनिमाड-कलासमूहः, खण्डवा)

## छात्रप्रातिभम्

❍ **शृङ्गेरीपरिसरछात्राणाम् उपलब्धयः** - ■ शृङ्गेरीपरिसरस्य शिक्षाशास्त्रिच्छात्रो नवीनभट्टः ११.०९.११ दिनाङ्के शिवमोग्गानगरे तरुणोदयसंस्कृतसेवासंस्थया सञ्चालितायां संस्कृतभाषणस्पर्धायां द्वितीयपुरस्कारं धनराशिं (रू. २०२१/-) च प्राप्नोत्।

■ २०११ वर्षे जूनमासे प्रवृत्तायां विश्वविद्यालयानुदानायोगेन समायोजितायां कनिष्ठशोधकवृत्तिपरीक्षायां लक्ष्मीनारायणजेना, जानकीशरणः, गणपतिहेगडे इत्येते छात्राः सफलताम् आपुः।

■ नवम्बरमासे हासनगरे आदिचुञ्चुनगिरिमठद्वारा चालितासु स्पर्धासु गणेशहेगडे, रञ्जनीभट्टः इत्येताभ्यां छात्राभ्यां क्रमशः प्रथमद्वितीयस्थाने प्राप्ते।

■ उत्तरप्रदेशसंस्कृतसंस्थानेन वाराणस्यां महात्मगान्धी-काशीविद्यापीठे सञ्चालितासु स्पर्धासु भरतहर्डिकरः, कु. सरयूः, ईश्वरमूर्तिः, प्रमोदभट्टः, गणेशहेगडे इत्येते छात्राः पुरस्कारान् प्राप्य परिसरस्य कीर्तिं समभ्यवर्धयन्।

❍ **राजस्थानप्राशासनिकसेवायां (RAS) चिताः राजस्थान-परिसरच्छात्राः** - २०१० राजस्थानप्राशासनिकसेवायां दीपीगोयल-किरणखींची-प्रमोदकुमारशर्मप्रमुखाः जयपुरपरिसरच्छात्राः चिताः इति संस्थानपक्षतः तेभ्यः अभिनन्दनानि।

अभिवर्धताम्

# कुलपतेः दैनन्दिनी

| | |
|---|---|
| ०५.०७.११ | उज्जयिनीस्थ-महर्षिसान्दीपनिरााये सञ्चष्ट्र्यवेदविद्याप्रतिष्ठानेन आचार्यस्य एस्. सुदर्शनशर्मणः सभापतित्वे समायोजयिष्यमाणायाः विश्ववेदसङ्गोष्ठ्याः रूपरेखाविषलनसमित्युवेशने उपस्थितिः। |
| ०६.०७.११ | नवदेहलीस्थ-शास्त्रिभवने मानवसंसाधनविकासमन्त्रालयस्य भाषिक-उपसचिवस्य आध्यक्ष्ये प्रवृत्ते राष्ट्रपतिसम्मानसम्बद्धे अनुवीक्षणसमित्युपवेशने उपस्थितिः। उज्जयिनीस्थ-महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानस्य शासीपरिषदः २६तमे उपवेशने उपस्थितिः। |
| ०७.०७.११ | नवदेहल्यां डी.के. प्रिण्टवर्ल्ड् इत्यस्य एफ्-३९५, सुदर्शनपार्के 'वेदश्रीः' इति नूतनकार्यालयस्य उद्घाटनम्। |
| ०८.०७.११ | मानवसंसाधनविकासमन्त्रालयस्य भाषिकसंयुक्तसचिवस्य पुरतः राष्ट्रियसंस्कृतसंस्थानस्य कार्यकलापस्य प्रदर्शनम्। |
| ०९.०७.११ | जयपुरपरिसरे भोपालपरिसरप्रायोजितायां शोधप्रविधि-पाण्डुलिपिविज्ञान- कार्यशालायाम् उद्घाटनकार्यक्रमे आध्यक्ष्यम्। |
| १७-१९.०७.११ | मैसूरस्थ-भारतीयभाषासंस्थानेन आयोजिते 'भारतीयभाषाध्ययनस्य मूलम्' इति विषयके त्रिदिवसीये उपवेशने उपस्थितिः। |
| २०.०७.११ | राष्ट्रियसंस्कृतसंस्थानस्य अधिकारिभिः सह प्रवृत्ते उपवेशने आध्यक्ष्यम्। |
| २२.०७.११ | आदर्शसंस्कृतमहाविद्यालयानां प्राचार्यैः सह प्रवृत्ते उपवेशने आध्यक्ष्यम्। |
| २६-२८.०७.११ | राष्ट्रियसंस्कृतमुख्यालये साहित्य-शिक्षाशास्त्रविषययोः सहायकाचार्यपदस्य व्याकरणविषयस्य सहाचार्यपदस्य च चयनसमित्योः आध्यक्ष्यम्। |
| २७.०७.११ | नवदेहलीस्थ-वाणीप्रकाशेन इण्डिया-हेबीटेट-सेन्टर् इत्यत्र आचार्यहज़ारीप्रसाद द्विवेदिकृतं 'बाणभट्ट की आत्मकथा' इति उपन्यासमुद्दिश्य व्याख्यानम्। |
| २८.०७.११ | नवदेहलीस्थ-इण्डिया-हेबीटेट-सेन्टर् इत्यत्र २०११ तमस्य वर्षस्य कृते प्रदीयमानस्य राष्ट्रपतिसम्मानपत्रस्य महर्षिबादरायणव्याससम्मानस्य च प्राथमिकचयनसमित्युपवेशने सम्बद्धनाम्नां संस्तुतिः। संस्थानमुख्यालये व्याकरणसहायकाचार्यपदस्य चयनसमितेः आध्यक्ष्यम्। |
| २९.०७.११ | संस्थानस्य प्रबन्धमण्डलस्य उपवेशने आध्यक्ष्यम्। परीक्षानुभागस्य सहायककुलसचिवस्य श्रीरामलखनमिश्रस्य सेवानिवृत्तिकार्यक्रमे आध्यक्ष्यम्। |
| ०१.०८.११ | संस्थानमुख्यालये मानवसंसाधनविकासमन्त्रालयस्य भाषिकसंयुक्तसचिवस्य सभापतित्वे प्रवृत्ते सहायतानुदानसमित्युपवेशने उपस्थितिः। |
| ०३.०८.११ | राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषत्सम्बद्धे परिसरप्राचार्याणामुपवेशने आध्यक्ष्यम्। |
| ०५.०८.११ | भाषिकसंयुक्तसचिवेन सह संस्थानां सम्बद्धीकरणविषये चर्चा। |
| १०.०८.११ | संस्थानमुख्यालये संस्कृतसप्ताहोत्सवस्योद्घाटनकार्यक्रमे आध्यक्ष्यम्। संस्थानमुख्यालये हरिद्वारस्थ-उत्तराखण्डसंस्कृतविश्वविद्यालयस्य कार्यपरिषदः उपवेशने उपस्थितिः। |
| ११.०८.११ | नवदेहलीस्थ-श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य कार्यपरिषदः ७५तमे उपवेशने उपस्थितिः। |
| १३.०८.११ | नवदेहलीस्थ-राष्ट्रियसंग्रहालये संस्कृतदिवसमहोत्सवे समुपस्थितिः। |
| १६.०८.११ | संस्थानमुख्यालये संस्कृतसप्ताहोत्सवस्य सम्पूर्तिकार्यक्रमे आध्यक्ष्यम्। |
| १९.०८.११ | संस्थानमुख्यालये प्रकाशननियमालोचनविषयके प्रकाशनसमित्युपवेशने आध्यक्ष्यम्। |
| २०.०८.११ | भोपाले मध्यप्रदेशशासन-भारतभवनाभ्यां समायोजिते कार्यक्रमे व्याख्यानम्। |
| २३.०८.११ | अनौपचारिकसंस्कृतशिक्षणसम्बद्धसम्मिलने आध्यक्ष्यम्। |
| २५.०८.११ | नवदेहल्यां टैगोरगार्डन् इत्यत्र विद्यालयप्रबन्धसमित्युपवेशने आध्यक्ष्यम्। |
| २७.०८.११ | इण्डिया-इण्टरनेशनल्-सेण्टर् इत्यत्र विश्वसंस्कृतसम्मेलनायोजकसमित्युपवेशने समुपस्थितिः। |
| २८.०८.११ | जयपुरे सरस्वती-प्राच्यविद्याशोधप्रतिष्ठानस्य जयपुरपरिसरस्य च मिथः सहयोगेन अन्यच्च'-उपन्यासविषयकपरिचर्चायां समुपस्थितिः। |
| ०४.०९.११ | कोटायां वर्धमान्-महावीर-मुक्तविश्वविद्यालयेन समायोजिते 'कोटा-साहित्योत्सव-२०११' इति कार्यक्रमे सहभागिता। |
| ०६.०९.११ | संस्थानस्य परीक्षामण्डलस्योपवेशने आध्यक्ष्यम्। |
| ०८.०९.११ | विश्वसंस्कृतसम्मेलनविषयकोपवेशने आध्यक्ष्यम्। अनौपचारिकसंस्कृतशिक्षणसम्बद्धे समागमे आध्यक्ष्यम्। |
| ०९.०९.११ | हरिद्वारे राष्ट्रियसंस्कृतसंस्थान-उत्तराखण्डसंस्कृतविश्वविद्यालयाभ्याम् आयोजितायाम् अन्ताराष्ट्रियसंस्कृतशोधसङ्गोष्ठ्याम् आधारव्याख्यानम्। |



१२.०९.११ संस्थानस्य सामान्यपरिषदः सम्मिलने उपस्थितिः।

१३.०९.११ संस्थानस्य शैक्षणिकपरिषदः समागमे आध्यक्ष्यम्।

१४.०९.११ संस्थानस्य प्रबन्धनमण्डलस्य उपवेशने आध्यक्ष्यम्।

१६-१९.०९.११ गेङ्गटोके राष्ट्रियसंस्कृतसंस्थान-भारतीयबौद्धाध्ययनसभा, जम्मूविश्वविद्यालययोः संयुक्ततत्त्वावधाने प्रवृत्ते 'पूर्वोत्तरसङ्गोष्ठी २०११' इति कार्यक्रमे सहभागिता।

२१-२४.०९.११ जम्मूपरिसरे अन्तःपरिसरीययुवमहोत्सवे सहभागित्वम्।

२६.०९.११ संस्थाने उज्जयिनीस्थ-कालिदाससंस्कृताकादम्याः उपवेशने आध्यक्ष्यम्। नवदेहलीस्थ-सी.जी.ओ. काम्पलेक्स् (केन्द्रीयशासनकार्यालयभवनसमूहे) भारतशासन-सूचनाप्रौद्योगिकीमन्त्रालयस्य सूचनाप्रौद्योगिकीविभागस्य सचिवया डा. अनीताभटनागर जैनवर्यया सह चर्चा।

२७.०९.११ जयपुरे वाराणसीस्थ-आचार्यरामचन्द्रद्विवेदिभारतीयविद्यापीठस्य जयपुरस्थ-राजस्थानविश्वविद्यालयस्य च संयुक्तोपक्रमे आयोजिते आचार्यरामचन्द्रद्विवेदिसमारोहे सहभागित्वम्।

२८.०९.११ आदर्शसंस्कृतमहाविद्यालयपरियोजनासम्बद्धसमागमे संयुक्तसचिवेन (भाषायाः) सह परिचर्चा।

२९.०९.११ विश्वविद्यालयानुदानयोगे पोस्ट-डाक्टरेट्-अनुसन्धान-पुरस्कारविषयके बाह्यस्वरूपोपवेशने समुपस्थितिः। संस्थाने प्रकाशनसमित्युपवेशने आध्यक्ष्यम्।

०१-२९.१०.२०११ संयुक्तराष्ट्र-अमेरिकायां न्यूयार्कस्थ-कोलम्बियाविश्वविद्यालये मध्यपूर्व-दक्षिणैशिया-अफ्रीकन्-अध्ययनविभागेषु व्याख्यानानि।

०१.११.२०११ नवदेहलीस्थ-देववाणीपरिषदा 'पण्डितराजसम्मानः २०११' सम्प्राप्तः।

०३.११.२०११ नवदेहलीस्थ-इन्दिरागान्धीराष्ट्रियकलाकेन्द्रेणायोजितायां "International conference on Asian Encounters: Network of Cutural Interection इत्याख्यायां संगोष्ठ्यां "भारतीयकाव्यशास्त्रं : भरतात् अभिनवगुप्तं यावत्' इति शोधपत्रं प्रास्तौत्।

०५.११.२०११ संस्थानमुख्यालये पञ्चदशस्य विश्वसंस्कृतसम्मेलनस्य स्मारिकायाः सम्पादकमण्डलस्योपवेशने आध्यक्ष्यम्।

०९.११.२०११ 'Being Different' इति श्रीराजीवमल्होत्रा (प्रिंसटन् संयुक्तराष्ट्र-अमेरिका) प्रणीतश्रेष्ठसूचनात्मकग्रन्थमाश्रित्य देहल्यां दिल्लीविश्वविद्यालयस्य श्री-अरविन्दोमहाविद्यालयस्य संस्कृतविभागः वेव्स (WAVES) इत्याभ्यां संस्थाभ्यां समायोजितायां संवादगोष्ठ्यां समुपस्थितिः।

१२.११.२०११ श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठं कालिदाससंस्कृतसङ्गीतकलाकादमी इत्याभ्यां संस्थाभ्यां संयुक्तरूपेण समायोजितायां राष्ट्रियसङ्गोष्ठ्यां काव्यसङ्गोष्ठ्यां च मुख्यातिथ्यम्।

१४.११.२०११ विश्वविद्यालयानुदानायोगेन समायोजिते संस्कृतविद्यायाः विशेषज्ञसमितेः उपवेशने समुपस्थितिः। विश्वसंस्कृतसम्मेलनस्य स्मारिकायाः सम्पादकमण्डलस्योपवेशने आध्यक्ष्यम्।

१५.११.२०११ नवदेहल्यां भारतीयसांस्कृतिकसम्बन्धपरिषदा (ICCR द्वारा) "Distinguested Visitor Programme 2011-12" इत्यन्तर्गततया 'सरस्वतीसंस्कृतसम्मानः २०१०' इत्यनेन सभाजितेन श्रीज्ञानीपेन्नीग्रीनी इत्यनेन सह सम्मिलनम्।

१८.११.२०११ नवदेहल्यां श्रीमत्या शीलादीक्षितमहोदयया (मुख्यमन्त्री, दिल्लीप्रदेशः) सह समुपवेशनम्।

२१.११.२०११ संस्थानमुख्यालये राष्ट्रियसंस्कृतसंस्थानस्य त्रयोदशतमे वित्तीयोपवेशने आध्यक्ष्यम्।

२२.११.२०११ संस्थानमुख्यालये राष्ट्रियसंस्कृतसंस्थानस्य त्रिंशतमे प्रबन्धमण्डलस्योपवेशने आध्यक्ष्यम्।

२३.११.२०११ संस्थानमुख्यालये राष्ट्रियसंस्कृतसंस्थानस्य परिसरप्राचार्याणामुपवेशने आध्यक्ष्यम्।

२४.११.२०११ वृन्दावने वृन्दावनशोधसंस्थाने डा. रामदासगुप्तस्मृतिव्याख्यानावसरे भाषणम्।

२५.११.२०११ मानवसंसाधनविकासमन्त्रालयस्य भाषिकसंयुक्तसचिवस्य आध्यक्ष्ये समायोजिते विश्वसंस्कृतसम्मेलनआयोजकसमितेः उपवेशने समुपस्थितिः।

२६.११.२०११ अहमदाबादे छारोडीस्थ-'दर्शनम्'-संस्कृतमहाविद्यालये समायोजितायाम् अखिलभारतीय शलाकास्पर्धायां समुपस्थितिः।

२९.११.२०११ नवदेहलीस्थ-इन्दिरागान्धीराष्ट्रियकलाकेन्द्रे विश्वसंस्कृतसम्मेलनसम्बद्ध प्रदर्शिनीसमितेः उपवेशने समुपस्थितिः।

३०.११.२०११ राष्ट्रियसंस्कृतसंस्थानस्य केन्द्रीयशोधमण्डलस्योपवेशने आध्यक्ष्यम्।

०२.१२.२०११ नवदेहल्यां राष्ट्रियशैक्षिकानुसन्धान-प्रशिक्षणपरिषदा समायोजितेः पुनर्नवीकरणपाठ्यक्रमस्य सम्पूर्तिसमारोहे मुख्यातिथ्यम्।

०४.१२.२०११ भोपालपरिसरे नाट्यशास्त्राध्ययनकेन्द्रस्योपवेशने आध्यक्ष्यम्।

०५.१२.२०११ संस्थानमुख्यालये भवनकार्यसमितेः उपवेशने आध्यक्ष्यम्।

०८.१२.२०११ टैगोरगार्डनस्थ-केन्द्रीयविद्यालयस्य विद्यालयप्रबन्धनसमितेः उपवेशने आध्यक्ष्यम्।

२०.१२.२०११ पञ्चदशतमे विश्संस्कृतसम्मेलने मानार्थोपाधिं (विद्यावाचस्पतिं) प्रदातुं संस्तुत्यर्थम् उपसमितेः उपवेशने आध्यक्ष्यम्।

२२.१२.२०११ राष्ट्रियसंस्कृतसंस्थानस्य वित्तसमितेः प्रबन्धमण्डलस्य चोपवेशने आध्यक्ष्यम्।

२३.१२.२०११ जनपदहोटल् इत्यत्र विश्वसंस्कृतसम्मेलनमुद्दिश्य पत्रकारसम्मेलनं समाहूतम्।

## संस्थानविदुषां गतिविधयः/कार्यकलापाः

**आचार्यवेम्पटिकुटुम्बशास्त्री** – शृङ्गेरीपरिसरे प्राचार्यः आचार्यवेम्पटिकुटुम्बशास्त्री १७.०८.११ दिनाङ्के मैसूरुमण्डलान्तर्गतकृष्णराजनगरे विद्यमानया यडतोरेयोगानन्दमठीयया वेदान्तभारतीसंस्थया शास्त्रप्रशासनकौशलार्थं श्रीश्रीशङ्करभारतीमहास्वामिभिः सम्मानितः। ०१.०९.११ तः १३.०९.११ दिनाङ्कपर्यन्तं दक्षिणाम्नाय- शृङ्गेरीश्रीशारदापीठे प्रवृत्तायां श्रीमहागणपतिवाक्यार्थसभायां वाक्यार्थं विधाय जगद्गुरुभिः श्रीभारतीतीर्थमहास्वामिभिः स्वर्णाङ्गुलीयकेन सम्मानितः। नवम्बर्मासे पञ्चमदिनाङ्कात् अष्टमदिनाङ्कं यावत् बेङ्गलूरुस्थपूर्णप्रज्ञसंशोधनमन्दिरे राष्ट्रियसंस्कृतसंस्थानेन आयोजितायां विवेकचूडामणिविषयककार्यशालायाम् आधारपुरुषत्वेन व्याख्यानमकार्षुः।

**आचार्यविश्वमूर्तिशास्त्री** – १०.०७.२०११ दिनाङ्के जम्मू-हरिद्वार-ट्रस्टद्वारा समायोजिते विशेषसमारोहे परिसरप्राचार्यः आचार्यः विश्वमूर्तिशास्त्री सम्मानितः।

**प्रो. हरेकृष्णमहापात्रः** – गरलीपरिसरप्राचार्यः प्रो. हरेकृष्णमहापात्रः राष्ट्रियसंस्कृतसंस्थानस्य पुरीस्थे श्रीसदाशिवपरिसरे सर्वदर्शनविभागस्य जातीयज्ञान-मीमांसामवलम्ब्य चर्चासत्रे उद्यापनसमारोहे दिनाङ्के २३.१०.२०११ सारस्वतातिथिरूपेण उपस्थितः। अनेन "व्याकरणदर्शने प्रमाणम्" इत्याख्यं शोधपत्रं प्रास्तावि। दिनाङ्कयोः ९-१०.११.११ पुरीस्थ-श्रीजगन्नाथसंस्कृतविश्वविद्यालये व्याकरणविभागस्य प्रश्नपत्रसंशोधनसमितौ अध्यक्षरूपेणोपस्थाय स्वीयं दायित्वं निरवहत्।

**डा. बनमाली बिश्वालः** – इलाहाबादपरिसरे सहाचार्यः अयं ११.०८.११ दिनाङ्के राष्ट्रियसंस्कृतसंस्थानस्य मुख्यालये आयोजिते कविसपर्या-कार्यक्रमे जगन्नाथपाठकस्य कृतित्वं व्यक्तित्वं च अधिकृत्य शोधपत्रं प्रस्तुतवान्। १३.०८.११ दिनाङ्के राष्ट्रियसंस्कृतसंस्थानेन नवदेहलीस्थ-राष्ट्रिय-संग्रहालये आयोजिते ग्रन्थलोकार्पण-कार्यक्रमे (स्वपुस्तकयोः लोकार्पणावसरे) भागं गृहीतवान्। २६.८.११ दिनाङ्के प्रसारभारत्याः आकाशवाणी-कार्यक्रमे संस्कृतकथासाहित्यस्य आधुनिकप्रवृत्तिः इति विषयमधिकृत्य संस्कृतवार्तां प्रस्तुतवान्। २३.०९.२०११ तः २६.९.२०११ यावत् ओडिशा-प्रान्ते भुवनेश्वरे समायोजिते चतुर्दिवसीये जयदेवसमारोहे भागं गृहीत्वा जयदेवस्य गीतगोविन्दमधिकृत्य शोधपत्रं प्रस्तुतवान्, तत्रत्ये कविसमवाये च स्वरचितं काव्यं प्रस्तुतवान्।

**डॉ. रामचन्द्रुलबालाजी** – डॉ. रामचन्द्रुलबालाजी २८.११.११ दिनाङ्के आन्ध्रप्रदेशीयतिम्मसमुद्रस्थेन एस्.जी.वी. ओरियन्टल कालेज् इत्यनेन संस्थानेन 'शास्त्रपण्डित' बिरूदेन सम्मानितः।

**डा. राकेशकुमारजैनः** – मुम्बईस्थ-के.जे. सोमैया संस्कृत-विद्यापीठस्य साहित्यविभागस्यांशकालिकव्याख्याता डा. राकेशकुमारजैनः कनाडादेशस्य 'टोरेण्टो नगरे' जैनिसम्मेलने पर्युषणमभिलक्ष्य समायोजितायां जैनदर्शनसंगोष्ठ्यां सितम्बरमासस्य ०२.०९.२०११ तः ११.०९.२०११ यावत् भागं गृहीत्वा राष्ट्रियसंस्कृतसंस्थानस्य गौरवं अन्ताराष्ट्रिये पटले व्यवीवृधत्।

**डॉ. रमाकान्तपाण्डेयः** – ६अगस्त जोधपुरे मानिसंह-पुस्तप्रकाशकेन्द्रे व्याख्यानम्। ५ नवम्बर, डॉ. हरिसिंहगौरविश्वविद्यालये, संस्कृतविभागे, राष्ट्रियसङ्गोष्ठ्यां व्याख्यानम्, १२-१४ अक्टू. राष्ट्रियसङ्गोष्ठ्याः संयोजनं तत्र व्याख्यानं च। १०.८.२०११ विद्वत्सपर्यायां 'व्याकरणे प्रस्थानपरीवर्तः' इति विषये व्याख्यानम्। ११.८.२०११ कविसान्निध्य जगन्नाथपाठकस्य साहित्यमधिकृत्व्याख्यानम्।

**डा. जयप्रकाशनारायणः** – राष्ट्रियसंस्कृतसंस्थानस्य मुख्यालये मुक्तस्वाध्यायपीठे सहायकाचार्यत्वेन कार्यं कुर्वाणोऽयं हरिद्वारस्थ-उत्तराखण्डसंस्कृतविश्वविद्यालयेन ०९-११.०९.२०११ मिते काले समायोजिते अन्ताराष्ट्रियसंस्कृतशोधसम्मेलने ११.०९.२०११ दिनाङ्के 'संस्कृतं सङ्गणकञ्'चेति विषये शोधपत्रं प्रस्तुतवान्। १८.०८.२०११ दिनाङ्के दिल्लीविश्वविद्यालयस्य कमलानेहरुमहाविद्यालये संस्कृतव्याकरणाध्यापनपद्धति-विषये विशिष्टव्याख्यानं प्रादात्।

**डा. अजयकुमारमिश्रः** – ११-१३.०८.११ इत्यवधौ कोलकातायां राष्ट्रियसंस्कृतसंस्थानमुख्यालस्य सहायकाचार्योऽयं यूनेस्को-घोषितस्य रवीन्द्रनाथटैगोरस्य १५०तमस्य जन्मशताब्दीवर्षकार्यक्रमस्य क्रमे साहित्याकादमीसमायोजिते १८ भारतीयभाषाणां युवविद्वत्सम्मेलने संस्कृतभाषाप्रतिनिधित्वेन भागं गृहीत्वा रवीन्द्रनाथटैगोरे संस्कृतस्य प्रभावः इति विषयमधिकृत्य शोधपत्रं प्रास्तौत्। ३०-३१.०७.११ इत्यवधौ फर्स्ट्-सर्व् दिल्ली चैप्टर् संस्थया दिल्लीस्थ-जवाहरलालनेहरूजनसम्पर्कसङ्काये आयोजितायां 'साईण्टिफिक डेटिंग आफ एनसिएन्ट इवेण्ट्स् बिफोर २००० बी. सी.' इति विषयाधारितायां त्रिदिवसीयराष्ट्रियसंगोष्ठ्याम् भागं गृहीतवान्।

**डा. पङ्कजकुमारव्यासः** – बघौलास्थ-हरियाणासंस्कृतविद्यापीठे (आदर्शमहाविद्यालये) व्याकरणविभागे सहायकाचार्यपदे कार्यं कुर्वाणोऽयं वाराणसीस्थ-काशीहिन्दूविश्वविद्यालयस्य व्याकरणविभागे समायोजितायां कार्यशालायां १२-१५.०७.२०११ मिते काले तत्र भागमगृह्णात्।

**डा. प्रफुल्लगडपालः** – संस्थानमुख्यालये दूरस्थशिक्षाविभागे सहायकाचार्यत्वेन कार्यं कुर्वाणोऽयं राष्ट्रियसंस्कृतसंस्थानस्य जयपुरपरिसरे डा. रमाकान्तपाण्डेयस्य मार्गदर्शने 'स्वातन्त्र्योत्तरसंस्कृतसाहित्ये बुद्धचरिताश्रितसाहित्यस्य विकासः' इति विषयकं शोधप्रबन्धमुपस्थाप्य विद्यावारिधि-उपाधिमलभत।

**डा. महाबलेश्वर पी. भट्ट-डा. सुब्राय वी भट्ट-डा. गणेश ईश्वरभट्ट-श्री श्रीकराः** – शृङ्गेरीपरिसरे अध्यापकाः एते २१.०७.११ तः २३.०७.११ पर्यन्तं मैसूरुमण्डलान्तर्गतकृष्णराजनगरे विद्यमानया यडतोरेयोगानन्दमठीयया वेदान्तभारतीसंस्थया सञ्चालितायां विद्वत्सभायां भागमगृह्णन्।

**डा. राघवेन्द्रभट्टः** – शृङ्गेरीपरिसरे साहित्यप्राध्यापकोऽयं ०८.०८.११ तः २७.०८.११ पर्यन्तं हिमाचलप्रदेशविश्वविद्यालये प्रवृत्ते पुनश्चेतनवर्गे भागमग्रहीत्।

**डा. हरिप्रसादः** – शृङ्गेरीपरिसरे शिक्षाशास्त्रिप्राध्यापकोऽयं ०३.०७.११ तः १०.०७.११ पर्यन्तं महाविद्यालयीयछात्रवर्गस्य प्रशिक्षणप्रमुखत्वेन शिवमोग्गानगरे कार्यमकरोत्। ११.०९.११ दिनाङ्के तरुणोदयसंस्कृतसेवासंस्थया आयोजितायाः राज्यस्तरीयसंस्कृतभाषणस्पर्धायाः समारोपभाषणार्थम् अगच्छत्। १९.०९.११ दिनाङ्के शृङ्गेरी श्रीशारदापीठे "श्रीशङ्करसिद्धान्ताः श्री अभिनवविद्यातीर्थमहास्वामिनश्च" इत्यस्मिन् विषये व्याख्यानमकरोत्।

**डा. चन्द्रकला आर्.कोण्डि** – शृङ्गेरीपरिसरे साहित्यप्राध्यापिका इयं १०.०९.११ दिनाङ्के हरिद्वारे उत्तराखण्डविश्वविद्यालये प्रवृत्तायां अन्ताराष्ट्रियसङ्गोष्ठ्यां भागमग्रहीत्।

**डा. रामचन्द्रजोयिस्** – शृङ्गेरीपरिसरे साहित्यप्राध्यापकोऽयं ०१.०८.११ तः २०.०८.११ पर्यन्तं राजस्थानविश्वविद्यालये प्रवृत्ते पुनश्चेतनवर्गे भागमग्रहीत्।

**डा. सूर्यनारायणभट्टः** – शृङ्गेरीपरिसरे मीमांसाप्राध्यापकोऽयं २१-२२.०८.११ दिनाङ्कयोः मडगांव, गोवा इत्यत्र श्रीकृष्णजन्माष्टमीं निमित्तीकृत्य आयोजिते गोष्ठीकार्यक्रमे 'मीमांसाशास्त्रस्य परिचयः' इति विषये व्याख्यानं दत्तवान्। संस्कृतोत्सवकार्यक्रमे शिवमोग्गानगरे "संस्कृतभाषायाः लोकोपयोगिता" इति विषये व्याख्यानं दत्तवान्।

**श्रीरामकृष्णपेजत्तायः**-शृङ्गेरीपरिसरे ज्यौतिषप्राध्यापकोऽयं ०१-०३.०७.११ दिनाङ्केषु कर्नाटकसंस्कृतविश्वविद्यालयेन आयोजिते पुनश्चेतनशिबिरे व्याख्यानं प्रायच्छत्।

**डा. सुदर्शनचिपळूणकरः** – शृङ्गेरीपरिसरे साहित्यप्राध्यापकोऽयं ०१-०३.०७.११ दिनाङ्केषु कर्नाटकसंस्कृतविश्वविद्यालयेन आयोजित पुनश्चेतनशिबिरे संयोजकत्वेन

कार्यमकरोत्। ०४.०७.११ तः १०.०७.११ पर्यन्तं शिवमोग्गानगरे प्रवृत्ते महाविद्यालयीयछात्रवर्गे प्रशिक्षकत्वेन कार्यमकरोत्।

**डा. सुकान्तकुमारसेनापतिः** – पुरीपरिसरे अध्यापकोऽयं ०९.०९.२०११ तः ११.०९.२०११ दिनाङ्कपर्यन्तम् उत्तराखण्डसंस्कृतविश्वविद्यालये अन्ताराष्ट्रियसम्मेलने आधारपुरुषरूपेण भागं गृह्णन् ओडिआ-साहित्यस्य 'रसकल्लोल' इति काव्ये संस्कृतस्य प्रभावः इति शोधपत्रं प्रास्तौत्।

**डा. श्रीमती मिनती रथः** – पुरीपरिसरस्य सहायकाचार्येयं पुरीस्थे श्रीजगन्नाथसंस्कृतविश्वविद्यालये १४.०८.२०११ दिनाङ्के 'संस्कृते नियुक्तिसुयोगाः' इति विषये आयोजिते राष्ट्रियचर्चासत्रे शोधपत्रं प्रास्तौत्।

**डा. रमाकान्तमिश्रः** – पुरीपरिसरस्य सहाचार्यः लोकभाषाप्रचारसमितिपक्षतः भक्तकविजयदेवः गीतगोविन्दञ्चेति विषये २३.०९.११ तः २५.०९.११ दिनाङ्कपर्यन्तं भुवनेश्वरे समायोजितायां राष्ट्रियसंगोष्ठ्यां भागमुद्‌वा शोधपत्रं प्रास्तौत्। पुरुषोत्तमप्राच्यशोधप्रतिष्ठानपक्षतः २१.०८.११ दिनाङ्के 'जगद्गुरुः' इति विषये पुर्यां समायोजितायां राज्यस्तरीयायां संगोष्ठ्यां शोधपत्रं प्रास्तौत्।

**डा. प्रभातकुमारमहापात्रः** – पुरीपरिसरस्य अध्यापकोऽयं तिरुपतिस्थराष्ट्रियसंस्कृविद्यापीठे शास्त्रवारिधिकक्षाङ्गभूततया स्वल्पकालीनपाठ्यक्रमे १२.०९.२०११ तः १५.०९.२०११ पर्यनतं व्याख्यानमददात्।

**डा. विश्वरञ्जनपतिः** – पुरीपरिसरस्य अध्यापकोऽयं तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठे २७.०८.२०११ तः ०१.०९.२०११ पर्यन्तं परीक्षाकार्ये भागमवहत्।

**डा. कृपाशङ्करशर्मा** – उज्जैनस्थे महाराजा-विक्रमादित्यशोधपीठे १६.०७.२०११ तः १७.०७.२०११ पर्यन्तं प्रवृत्तायां राष्ट्रियसंगोष्ठ्यां 'संस्कृकथासाहित्ये विक्रमादित्यः' इति विषये स्वकीयं शोधप्रबन्धं प्रास्तौत्।

**श्री सुब्रन् पी.के.** – गुरुवायूर्- परिसरसदस्यः श्री सुब्रन् पी.के. भारतीयदलितसाहित्याकादमीद्वारा ११-१२ दिनाङ्कयोः समायोजिते २७ तमे राष्ट्रियसम्मेलने डा. अम्बेडकर-फेलोशिप-नेशनल-अवार्ड-२०११ इत्यनेन सम्मानितः।

**डॉ. हरिनारायणधरद्विवेदी** – गरलीपरिसरस्य डॉ. हरिनारायणधरद्विवेदी उत्तराखण्ड-संस्कृत-विश्वविद्यालयेन सितम्बरमासस्य ९, १०, ११ दिनाङ्केषु समायोजिते अन्ताराष्ट्रिय-संस्कृत-शोधसम्मेलने भागं गृहीत्वा "उत्तरभारतीयभाषाः संस्कृतञ्च" इति शीर्षकमाधारीकृत्य स्वकीयं शोधपत्रं प्रास्तौत्।

**डॉ. राधावल्लभशर्मा** – गरलीपरिसरे अंशकालिकसहायकाचार्योऽयं राष्ट्रियसंस्कृतसंस्थानस्य जयपुरपरिसरे अक्टूबरमासस्य १२-१४ दिनाङ्कयोः प्रवृत्तायां "एकविंशशतकस्य प्रथमदशके संस्कृतपरम्पराणां विकासः" इति विषयाधारितायां राष्ट्रियसंगोष्ठ्यां भागं गृहीत्वा "वक्रोक्तिजीवितवालबोधिनीटीकायाः समीक्षणम्" इत्यस्मिन् विषये शोधपत्रं प्रास्तौत्।

**डा. बोधकुमारझा** – ०८-१०.११.२०११ इत्यवधौ दिल्लीसंस्कृत-अकादमीद्वारा आयोजितायां त्रिदिवसीयराष्ट्रियव्याकरणसङ्गोष्ठ्यां मुम्बईपरिसरस्य डॉ. बोधकुमारझा "पाणिनीयव्याकरणे विविधवैकल्पिकपदानाम् उपयोगिता" इति विषये शोधपत्रवाचनमकरोत्।

**डा. माधवदत्तपाण्डेयः** – मुम्बईपरिसरस्य डॉ. माधवदत्तपाण्डेयः २०.१०.११ दिनाङ्के भारतीयविद्याभवनमुम्बय्यां संस्कृतशिक्षा मानवीयमूल्यानीतिश्चेति विषयमधिकृत्य मुख्यवक्तृरूपेण व्याख्यानमकरोत्।

**डा. देवदत्तसरोदे** – मुम्बईपरिसरसहायकाचार्यः डॉ. देवदत्तसरोदे १०.११.११ दिनाङ्के विश्वशैक्षिकसम्मेलने पनवेलकेन्द्रीयविद्यालये "अध्यापकशिक्षा-आह्वानानि उत्तरदायित्त्वानि" (Teacher Education: Challenges and Responses) इति विषये भागमवहत्।

**डा. मदनमोहनझा** – मुम्बईपरिसरे शिक्षाशास्त्रविभागाध्यक्षः डॉ. मदनमोहनझा ०३.१२.११ पुरीस्थे सदाशिवपरिसरे राष्ट्रियशिक्षासङ्गोष्ठ्यां "संस्कृतशिक्षणे सङ्गणकस्य प्रयोगः" इति विषये स्वशोधलेखं प्रास्तौत्।

**डॉ. आर्. गायत्रीमुरलीकृष्णः** – मुम्बईपरिसरस्य डॉ. आर्. गायत्रीमुरलीकृष्णः ०३.१२.११ दिनाङ्के पुरीस्थे सदाशिवपरिसरे राष्ट्रियशिक्षासङ्गोष्ठ्यां "प्राचीनशिक्षणतन्त्रयुक्त्युपागमाः" इति विषये स्वशोधलेखं प्रास्तौत्।

**डॉ. नीलाभतिवारी** – भोपालपरिसरस्य शिक्षाशास्त्रविभागस्य सहायकाचार्येणानेन हिमाचलप्रदेशविश्वविद्यालये अकादमीकस्टॉफमहाविद्यालये दिनाङ्क २१.११.११ तः १०.१२.११ पर्यन्तं शिक्षाशास्त्रीयपुनश्चर्यापाठ्यक्रमः कृतः।

**डा. सनन्दनत्रिपाठि-डॉ. धर्मेन्द्रकुमारसिंहदेवौ** – भोपालपरिसरस्य साहित्यविभागीयौ सहायकाचार्यौ एतौ अक्टूबरमासे जयपुरपरिसरे आयोजितायां राष्ट्रियसंगोष्ठ्यां शोधपत्रवाचनं कृतवन्तौ।

**डा. नरेशकुमारपाण्डेयः, डॉ. अवधेशश्रोत्रियश्च** – भोपालपरिसरस्य सहायकाचार्यौ एतौ नवम्बरमासे रीवास्थे शासकीयवेङ्कटसंस्कृतमहाविद्यालये आयोजितायां राष्ट्रियसंगोष्ठ्यां शोधपत्रमपठताम्।

**डा. नितिनजैनः** – भोपालपरिसरस्य शिक्षाशास्त्रविभागीयोऽयमध्यापकः १३-१४.११.११ दिनाङ्कयोः वाराणसीस्थ-काशीहिन्दुविश्वविद्यालये आयोजितायां राष्ट्रियसंगोष्ठ्यां "उत्तमाध्यापकशिक्षकेभ्यः सप्तव्यावसायिकदक्षताः" इति विषयमधिकृत्य शोधपत्रम् अपठत्।

**प्रो. शैलकुमारी मिश्रा** – प्रयागस्थ-गङ्गानाथ-झा-परिसरे आचार्येयं १८-२० सितम्बर, २०११ दिनाङ्केषु काशी-हिन्दू-विश्वविद्यालये आयोजितायां शोधसङ्गोष्ठ्यां भारतरत्न-डॉ. भगवान-दासस्य भारतीयवर्णव्यवस्थासम्बद्धदृष्टिकोणमधिकृत्य शोधपत्रं प्रस्तुतवती। २६-२७ नवम्बर, २०११ दिनाङ्कयोः ईश्वरशरणस्नातक-महाविद्यालये आयोजितायां शोधसङ्गोष्ठ्यां भागवतपुराणे प्रकीर्णकलाविषयमधिकृत्य शोधपत्रं प्रस्तुतवती।

**डॉ. उदयनाथ झा** – प्रयागस्थ-गङ्गानाथझापरिसरे सहाचार्योऽयं १४-१५ अक्टूबर २०११ दिनाङ्कयोः एल-एन-मिथिला-विश्वविद्यालये आयोजितायां राष्ट्रियशोधसङ्गोष्ठ्यां शोधपत्रं प्रस्तुतवान्।

**डॉ. जनार्दनप्रसादपाण्डेयः** – प्रयागस्थ-गङ्गानाथझापरिसरे सहाचार्योऽयं १४-१५.१०.२०११ दिनाङ्कयोः उत्तराखण्डसंस्कृतसंस्थाने नृत्यनाट्यस्पर्धयोः निर्णायकत्वेन समुपस्थितः। ०९.११.११ दिनाङ्के उज्जयिन्यां कालिदास-समारोहे आयोजिते कविसमवाये काव्यपाठः कविगोष्ठीसञ्चालनम् अकरोत्।

**डॉ. शैलजा पाण्डेया** – प्रयागस्थ-गङ्गानाथझापरिसरे सहायकाचार्या इयं १८-२० सितम्बर, २०११ दिनाङ्के काशीहिन्दू- विश्वविद्यालयराष्ट्रियमानव-संस्थानाभ्यामायोजितायां शोधसङ्गोष्ठ्यां प्राचीन भारतीय सामाजिकार्थिक व्यवस्थायां शूद्राणां योगदानमिति विषयमधिकृत्य शोधपत्रं प्रस्तुतवती।

**डॉ. विजयपालशास्त्री** – ०७.१२.२०११ दिनाङ्के डोहगीस्थ-श्रीसनातनधर्मादर्शनसंस्कृतमहाविद्यालये गरलीपरिसरस्य साहित्यविभागाध्यक्षोऽयं गीतादर्शने कर्मयोगे च व्याख्यानमकार्षीत्।

## प्रयागस्थ-गङ्गानाथझापरिसरवार्ता

**संस्कृतदिवससमारोहः** – राष्ट्रियसंस्कृतसंस्थानाङ्गभूते गङ्गानाथझापरिसरे २४-२६.०८.२०११ इत्यवधौ प्रवर्तिते त्रिदिवसीयसंस्कृतदिवससमारोहावसरे प्रथमदिने तिस्रः स्पर्धाः आयोजिताः – संस्कृतसम्भाषणस्पर्धा (मुखं व्याकरणं स्मृतम्), श्लोकपाठस्पर्धा (श्रीमद्भगवद्गीतायाः पञ्चदशोध्यायः) काव्यपाठस्पर्धा (बृहत्त्रयी) च।




संस्कृतदिवसावसरे भाषमाणः प्राचार्यः सर्वनारायणझाः

२५.०८.२०११ दिनाङ्के डा. किशोरनाथझामहोदयस्य मीमांसाशास्त्रविषयकं विशिष्टं व्याख्यानं संस्कृतकविसम्मेलनं च समायोजितम्। व्याख्यानकार्यक्रमे स्वागतभाषणं विषयप्रवर्तनं च परिचयप्राचार्यः सर्वनारायणझा प्रस्तुतवान्। ततः डा. किशोरनाथझावर्यस्य, अध्यक्षस्य डा. जगन्नाथपाठकस्य ऐषमः राष्ट्रपतिसम्मानेन सम्मानितस्य परिसरे शास्त्रचूडामणियोजनायां प्रतिष्ठितस्य आचार्यरहसबिहारिद्विवेदिनश्च सम्मानं प्राचार्येण विहितम्। तस्मिन्नेव दिने अपराह्ने प्रवर्तिते संस्कृतकविसम्मेलने डा. जगन्नाथपाठकस्य आध्यक्ष्ये आमन्त्रिताः संस्कृतकवयः स्वकीयं प्रत्यग्रमौलिककाव्यचयं प्रस्तुतवन्तः।



पुरस्कारप्रदानकार्यक्रमस्य किञ्चन दृश्यम्

२६.०८.२०११ तमे दिनाङ्के प्रवृत्ते पुरस्कारवितरणसमारोहे मुख्यातिथिरूपेण आचार्यदामोदररामत्रिपाठी, अध्यक्षत्वेन आचार्यहरिदत्तशर्मा सभामुद्बोधितवन्तौ। विजेतॄन् छात्रांश्च पुरस्कारैः सभाजितवन्तौ।

**हिन्दीपक्षोत्सवः** – परिसरेऽस्मिन् सितम्बरमासस्य द्वितीय-तृतीयसप्ताहयोः हिन्दीपक्षोत्सवः समायोजितः। तस्मिन्नवसरे परिसरीयकार्यालयसदस्यानां कृते हिन्दीभाषया कार्यालयीयपत्रलेखनस्पर्धा छात्राणां कृते निबन्धलेखनस्पर्धा चेति प्रतियोगिताद्वयं समायोजितम्। कार्यक्रमोऽयं परिसरप्राचार्यस्य नेतृत्वे सम्पन्नतां यातः।

**अनौपचारिकसंस्कृतशिक्षणकेन्द्रं समारब्धम्** – परिसरेऽस्मिन् २९.०९.२०११ तमे दिनाङ्के अनौपचारिकशिक्षणकेन्द्रस्य उद्घाटनसमारोहः सुसम्पन्नः। समारोहस्यास्य अध्यक्षत्वेन परिसरप्राचार्यः सर्वनारायणझा मुख्यातिथित्वेन इलाहाबादविश्वविद्यालयस्य संस्कृतविभागाध्यक्षः डा. शङ्करदयालद्विवेदी च सभाम् समुद्बोधितवन्तौ। स्वागतभाषणं डा. जनार्दनप्रसादपाण्डेयः, कक्षासञ्चालनपरिचयः श्रीशान्तनुः, धन्यवादज्ञापनं डा. शैलजापाण्डेया च विहितवन्तः। कार्यक्रमसञ्चालनं डा. अपराजिता मिश्रा अकरोत्।

## गुरुवायूर्-परिसरोदन्तः

**अध्यापकदिवसः** – ०५.०९.२०११ दिनाङ्के भूतपूर्वभारतराष्ट्रपतीनां पुण्यपुरुषाणां डा. सर्वेपल्ली राधाकृष्णन् महाशयानां जन्मदिनमुद्दिश्य अध्यापकदिवसाख्यकार्यक्रमः प्रवर्तितः। कार्यक्रमेऽस्मिन् आचार्यः सी. एच. लक्ष्मीनारायणशर्मा स्वागतभाषणम् अकरोत्। परिसरप्राचार्यः प्रो. एम्. ए. बाबुः राधाकृष्णवर्यस्य शिक्षाः विषयेऽभाषत। कार्यक्रमसञ्चालनं डा. के. के. सैन् अकरोत्।

**साप्ताहिकसंस्कृतमहोत्सवः** – १०.०८.२०११ तः १६.०८.२०११ पर्यन्तं सञ्चालितस्य दिनपञ्चकव्यापिनः साप्ताहिकसंस्कृतमहोत्सवस्य उद्घाटनं १०.०८.२०११ दिनाङ्के आचार्यश्रीवैद्यलिङ्गशर्मणः करकमलाभ्यां जातम्। परिसरप्राचार्यस्याध्यक्ष्ये प्रचलितेऽस्मिन् कार्यक्रमे मुख्यातिथिः अशोकन् पुरनाट्टुकरा-वर्यः 'संस्कृताध्ययनस्य दिशाः दशा' चेति विषये स्वाभिप्रायं प्राकटयत्। डा. आर. प्रतिभया धन्यवादार्पणं, ए. एम्. सि. त्रिविक्रमन् नम्बूतिरिमहाशयेन सञ्चालनञ्च कृतमासीत्।

उद्घाटनानन्तरं मध्याह्ने प्रश्नोत्तरीस्पर्धा अन्त्याक्षरीस्पर्धा च आयोजिते। ११.०८.२०११ दिनाङ्के क्रमेण वादविवादस्पर्धा आशुभाषणस्पर्धा च प्रवृत्ते। १२.०८.२०११ दिनाङ्के क्रमेण निबन्धरचनास्पर्धा, कवितारचनास्पर्धा च प्रवर्तिते। १५.०८.२०११ दिनाङ्के स्वातन्त्र्यदिनोत्सवे "स्वातन्त्र्यात् परं संस्कृतभाषाविकासः" इति शीर्षकमधिकृत्य डा. के. के. हर्षकुमार् उपन्यासमकरोत्।



संस्कृतसप्ताहोत्सवस्य उद्घाटनं कुर्वन्तः विद्वांसः

एतस्य साप्ताहिकसंस्कृतमहोत्सवस्य समापनकार्यक्रमः १६.०८.२०११ दिनाङ्के प्रातः प्रवर्तितः। तदर्थम् उद्घाटनं पुरनाट्टुकरास्थश्रीरामकृष्णमठाधिपतिः श्रीव्योमातीतानन्दस्वामी स्वकरारविन्दाभ्यां कृत्वा संस्कृतभाषाभिवृद्धिः बहुप्रकारेण कर्तव्येति अकथयत्। मुख्यातिथिपदं डा. टि. मिनिः अलङ्कृतवती। अकथयच्च सा 'संस्कृतभाषा साहित्यमात्रे न पर्यवस्यति अपितु विविधशास्त्रेषु अपि प्रवर्तते इति।' किञ्च परिसरप्राचार्यस्याध्यक्ष्ये, उपर्युक्तस्पर्धासु जेतृभ्यः राष्ट्रियसंस्कृतसंस्थानेन मुद्रितानि पुस्तकानि पुरस्काररूपेण डा. टि. मिनिः वितरितवती। अवसरेऽस्मिन् तत्तद्विभागाध्यक्षाः आशंसाभाषणमकुर्वन्। स्वागतभाषणं धन्यवादनिवेदनञ्च क्रमेण प्रो. सी. एच. लक्ष्मीनारायणशर्मा, डा. एन. आर. श्रीधरन् चाकुरुताम्। समापनसत्रस्यास्य सञ्चालिका प्रो. सी. एल. सिसिलिः आसीत्। इमं साप्ताहिकसंस्कृतमहोत्सवं परिसरप्राचार्यस्य एम. ए. बाबुवर्यस्य निर्देशने साहित्यसमित्यन्तर्गतानां सहाय्येन च डा. एन्. आर्. श्रीधरन् मुख्यसञ्चालकस्सन् प्रवर्तितवान् इति।


संस्कृतसप्ताहोत्सवस्य समापनावसरस्य किञ्चन दृश्यम्

**छात्रकल्याणसमितेः उद्घाटनम्** – १९.०८.२०११ दिनाङ्के २०११-१२ अध्ययनसंवत्सरस्य कृते छात्रकल्याणसमितेरुद्घाटनकार्यक्रमोऽभूत्। अस्मिन् कार्यक्रमे डा. आर. प्रतिभा समागतेभ्यः स्वागतं व्यवहृतवती। कार्यक्रममिमं "षैजु अन्तिक्काड्" (चलचित्रनिदेशकः) उद्घाट्य प्रकटीकृतवान् यत् "संस्कृतं चलचित्रमाध्यमेनापि प्रचारपदवीं प्राप्तुमर्हति" इति। कार्यक्रमविवरणपूर्वकं परिसरप्राचार्यः प्रो. एम्. ए. बाबुः छात्रनायकावश्यकत्वं प्रत्यपादयत्। अध्यक्षपदं निर्व्यूढवता आचार्यद्वितीयवर्षीयेण छात्रनायकेन सिजिल. एन. एस. नामकेन छात्रकल्याणानि कानीति क्रोडीकृतम्। तत्तत्समित्युपदेशकाः अध्यापकाः आशंसाभाषणेन छात्रान् अन्वगृह्णन्। आगतेभ्यः कार्तज्ञ्यं प्रकटीकृतं शास्त्रितृतीयवर्षीयेण हेमन्त्. पि. के. नामकेन छात्रकार्यदर्शिना इति।


छात्रकल्याणसमितेः उद्घाटनावसरस्य किञ्चन दृश्यम्

**हिन्दीदिवसोत्सवः** – १९.०९.२०११ दिनाङ्के परिसरप्राचार्यस्य एम्. ए. बाबुवर्यस्य आध्यक्ष्ये श्री टी. वी. जयकृष्णन्वर्यस्य च मुख्यातिथ्ये हिन्दीदिवसोत्सवः संवृतः। कार्यक्रमेऽस्मिन् आचार्यः चल्ला लक्ष्मीनारायणशर्मा हिन्द्याः स्वरूपं कथयन् इयं भाषा राजभाषापदं प्राप्स्यतीति विचारं प्राकटयत्। अवसरेऽस्मिन् परिसरच्छात्राः स्वीयाभिप्रायं प्रकटितवन्तः।

**औषधसस्यारोपणम्** – राष्ट्रियसेवायोजनायाः (NSS) नेतृत्त्वेन गुरुवायूरपरिसरेऽस्मिन् औषधसस्यानाम् आरोपः कृतः। अस्मिन् सन्दर्भे प्राचार्यः प्रो. एम्.ए. बाबुः आध्यक्षम् आवहत्। स्वागतं डा. के. सरलादेवी कार्तज्ञ्यं संयोजकः डा. के.के. हर्षकुमारः च कृतवन्तौ। केरलसर्वकारस्य 'औषधि'केन्द्रस्य संयोजकः डा. रजितन् (BAMS) अत्र मुख्यातिथ्यम् अलञ्चकार।

**पावरट्टीकेन्द्रे कुर्याक्कोस् स्मृतिभवनं संस्कृतमुखरितम्** – 'संस्कृतप्रणयभाजनेन' श्री.पी.टि.कुर्याक्कोसेन शतवर्षेभ्यः पूर्वं संस्थापितः संस्कृतकलालयः (साहित्यदीपिका) राष्ट्रियसंस्कृतसंस्थानस्याधीने प्रवर्तमानं श्री.पी.टि.कुर्याक्कोस् स्मृतिभवनं वर्तते। एतद्भवनमधुना पुनरपि संस्कृतमयकक्षाभिर्मुखरितं जायते। संस्कृतस्याभिवृद्ध्यर्थमत्र विविधाः कक्ष्याः प्रचलन्ति।



मुक्तस्वाध्यायपीठस्य उद्घाटनावसरे भाषमाणा पी.जी. प्रेमकुमारी

**मुक्तस्वाध्यायपीठमारब्धम्** – ऐषमः मुक्तस्वाध्यायपीठस्योद्घाटनं ११.१०.२०११ दिनाङ्के प्रातः दशवादनेऽभवत्। उद्घाटनकर्म कुन्नकुलम् विवेकानन्दकलालयप्राचार्या प्रवाचिका श्रीमती पी.जि. प्रेमकुमारी अकार्षीत्।

**व्याकरणशिल्पशाला** – निम्नस्तरीयाणां छात्राणां व्याकरणशास्त्रज्ञानाय एका व्याकरणशिल्पशाला गुरुवायूरपरिसरस्य व्याकरणविभागेन ०२.१०.११ तः १८.१०.११ मिते काले समायोजिता आसीत्। शताधिकाः विद्यार्थिनः शिल्पशालायां भागमग्रहीषुः।

## मुम्बईविद्यापीठे विविधकार्यक्रमाः

**संस्कृतसम्भाषणाभ्यासः** – विद्यापीठे आधुनिकपद्धत्या समधीतकक्षाणां नूतनप्रविष्टानां प्राचीनेषु सत्स्वपि संस्कृतसम्भाषणासक्तानां छात्राणां कृते विद्यापीठप्राचार्येण दशदिवसव्यापिसंस्कृत- सम्भाषणाभ्यासः २५.०७.२०११ तः समनुष्ठापि। तत्र आधुनिकविषयप्राध्यापकाः डा. रञ्जयकुमारसिंह–डा. गीतादूबे–डा. श्वेतासूदप्रभृतयोऽपि सोत्साहं भागमगृह्णन्।

**संस्कृतसप्ताहसमारोहः** – १०.०८.२०११ तः १६.०८.२०११ यावत् विद्यापीठे महता समारम्भेन संस्कृतसप्ताहसमारोहः समायोज्यत। तत्र १०.०८.२०११ दिनाङ्के राष्ट्रियसंस्कृतसंस्थानस्य कुलसचिवस्य आचार्यस्य के. बी. सुब्बरायुडुवर्यस्याध्यक्ष्ये सोमैयासंकुलस्य प्रधानस्य श्रीसमीर एस. सोमैयावर्यस्य मुख्यातिथित्वे समारोहस्योद्घाटनं समपद्यत। सञ्चालनं साहित्यसहायकाचार्येण डा. सुकान्तकुमारराजेन समपादि।



चाणक्यभवने समायोजिते संस्कृतसप्ताहोत्सवे मञ्चस्थाः कुलसचिवप्रमुखाः विद्वांसः

११.०८.२०११ तः १३.०८.२०११ दिनाङ्कं यावच्छात्रप्रातिभविवर्द्धिन्यो नैकाः प्रतिस्पर्द्धाः विद्यापीठस्य चाणक्यभवने समायोजिषत। एतासु भाषणस्पर्द्धा, एककसंस्कृतगीतस्पर्द्धा, वादविवादस्पर्द्धा, व्यङ्ग्यचित्रनिर्मितिस्पर्द्धा, सुभाषितपाठस्पर्द्धा, शास्त्रीयनृत्यस्पर्द्धा, भित्तिपत्रस्पर्द्धा, सङ्घनृत्यस्पर्द्धा, आशुचित्रणस्पर्द्धा, एककशास्त्रीयवादनस्पर्द्धा, साहित्यरचनास्पर्द्धा, स्फूर्त्तिस्पर्द्धा रङ्गवल्लीस्पर्द्धा च जाताः। एतासां स्पर्द्धानां संयोजकाः डा. स्वर्गकुमारमिश्र–डा. राकेशकुमारजैन–श्रीप्रियव्रतमिश्र– डा. श्वेतासूदाः आसन्।

१६.०८.२०११ दिनाङ्के सोमैयान्यासस्य मुख्यसचिवस्य श्री वी. रङ्गनाथस्य मुख्यातिथित्वे, परिसरप्राचार्यस्य प्रकाशचन्द्रस्याध्यक्ष्ये च संस्कृतसप्ताहस्य समापनसमारोहः प्रावर्तिष्ट। अत्र एस. एन. डी. टी. महिलाविश्वविद्यालयस्य संस्कृतविभागाध्यक्षा प्रो. शशी कश्यप सारस्वतातिथित्वेन समागता आसीत्। अस्मिन् अवसरे विद्यापीठीयविविधप्रतिस्पर्द्धासु विजेतृभ्यः ५० संख्यकप्रायेभ्यः समुपयोगिपुस्तकात्मक–पुरस्काराः प्राचार्यातिथिभिः व्यतारिषत। विद्वत्सपर्याकार्यक्रमे महाराष्ट्रशासनस्य पूर्वमानसेवी प. गुलामदस्तगीरबिराजदारः प्राचार्येण पुष्पफलराङ्कवमानद्रव्यादिभिः भृशं सम्मानितः। मुख्यातिथित्वं विभूषयता श्रीरङ्गनाथेन संस्कृतसप्ताहसमापनावसरे आशासि यद् अग्रिमः संस्कृतसप्ताहे विद्यापीठस्य स्वकीयभवन एव बोभूयादिति। समारोहेऽस्मिन् व्याकरणव्याख्यात्रा श्रीप्रियव्रतमिश्रेण स्वागतम्, शिक्षाशास्त्रव्याख्यात्रा डा. मुरलीकृष्णेन संस्कृतसप्ताहप्रतिवेदनम्, व्याकरणव्याख्यात्रा डा. माधवदत्तपाण्डेयेन धन्यवादज्ञापनम् साहित्यव्याख्यात्रा डा. स्वर्गकुमारमिश्रेण च सञ्चालनमन्वस्थायिषत।

**शिक्षकदिवसायोजनम्** – ०५.०९.२०११ दिनाङ्के विद्यापीठे शिक्षकदिवसः ससङ्कल्पं समायोज्यत। तत्र प्राचार्यस्य आध्यक्ष्ये छात्राः विद्वांसश्च विचारान् समुपास्थापयन्। तत्र मुख्यव्याख्यातार आसन् डा. मदनमोहनझाः, डा. बोधकुमारझाः, डा. सुशान्तकुमारराजः, डा. भरतगर्गः, डा. देवदत्तसरोदे, डा. स्वर्गकुमारमिश्रश्चेति। कार्यक्रमस्य सञ्चालनं राजनीतिशास्त्रीयव्याख्याता डा. रञ्जयकुमारसिंहः कृतवान्।

**वाग्वर्धिनीपरिषद उद्घाटनम्** – ०९.०९.२०११ दिनाङ्के विद्यापीठीयाया वाग्वर्धिनीपरिषदः समुद्घाटनं समजायत। तत्र व्याकरणसाहित्यज्यौतिषशिक्षाशास्त्रविभागीया विद्वांसः, छात्राश्च सम्भूय नानाशास्त्रतत्त्वानि अवगाहन्त। प्रतिसप्ताहं शुक्रवासरे परिषद उपवेशनं स्यात्, स्याच्च शास्त्रविचारदक्षताऽभिवृद्धिरिति आशासानः प्राचार्यः प्रकाशचन्द्रः तदर्थं सकलसौविध्यं प्रदातुं विश्वासवचः प्रादात्।

**संस्कृतस्वाध्यायप्रथमादीक्षोद्घाटनकार्यक्रमः** – ०९.०९.२०११ दिनाङ्के संस्कृतस्वाध्यायस्य प्रथमदीक्षाया उद्घाटनं विद्यापीठप्राचार्यकरकमलाभ्यां दीपप्रज्वलनेन व्यधायि। कार्यक्रमस्य सञ्चालनं डा. सीताराममहोदयेन समपादि। कार्यक्रमेऽस्मिन् ५० प्राया नागरिकाः संस्कृतस्नेहिनः समुपातिष्ठन्त, येषु गृहिण्यः, सर्वकारीयकर्मचारिणः, सेवानिवृत्ताः वयोवृद्धाः, आधुनिकविषयमधीयानाः छात्राश्च अहमहमिकया भागं ग्रहीतुमैच्छन्।

**राज्यस्तरीयभाषाणशलाकास्पर्धाः** – ऐषमः अखिलभारतीयशास्त्रीय–वाक्स्पर्धानिमित्तं महाराष्ट्र–गोवाराज्यस्तरीयस्पर्धालुगणचयनं विद्यापीठे अक्टूबरमासस्य २९ दिनाङ्के समनुष्ठितम्। तत्र महाराष्ट्रगोवाराज्याभ्यां विभिन्नप्रतिस्पर्धासु विंशत्यधिकाः प्रतिभागिनः समागताः आसन्। तेभ्यः सप्तसंख्याकाः छात्राः अखिलभारतीय–शास्त्रीयवाक्स्पर्धायै चिताः आसन्। तत्र न्यायनिर्णेतृरूपेण भारतीयप्रौद्योगिकीसंस्थातः (I.I.T) आचार्यमल्हारकुलकर्णी, आचार्यरामरूपमिश्रः, आचार्यः एन्.एन्. जोशी च भागमवहन्।



शिक्षादिवसावसरे भाषमाणः आचार्यः प्रकाशचन्द्रः

**शिक्षादिवसः** – भारतस्य प्रथमशिक्षामन्त्रिणः अब्दुलकलाम्आजाद–महोदयस्य जन्मदिवसं पुरस्कृत्य ११.११.२०११ दिनाङ्के के.जे. सोमैयासंस्कृतविद्यापीठे, मुम्बईपरिसरे शिक्षादिवसः समायोजितः।

**अनौपचारिकसंस्कृतशिक्षणकेन्द्रस्य समापनम्** – मुम्बईपरिसरे अनौपचारिकसंस्कृतशिक्षणकेन्द्रस्य अन्तिमा परीक्षा प्रथमविभागस्य शिक्षार्थिनां १६.१२.२०११ दिनाङ्के, द्वितीयविभागस्य परीक्षा १७.१२.२०११ दिनाङ्के च स्वीकृता आसीत्। विभागद्वयात्मकेऽस्मिन् केन्द्रे ८८ शिक्षार्थिनः सोत्साहं भागमगृह्णन्। परीक्षेयं लेखनमौखिकरूपेण सोपानद्वये प्राचलत्। लेखनपरीक्षायाः समनन्तरं डॉ. गायत्रीमुरलीकृष्णः मौखिकपरीक्षां स्वीकृतवान्। केन्द्रस्यास्य दीपेशकतिरा शिक्षकः, सो.ल.सीतारामशर्मा संयोजकश्चास्ताम्।



बालचरसंघस्य प्रशिक्षणावसरस्य किञ्चन दृश्यम्

**बालचरसङ्घप्रशिक्षणम्** – ऐषमः शिक्षाशास्त्रच्छात्राणां बालचरसङ्घप्रशिक्षणं ४.१२.२०११ दिनाङ्कात् १०.१२.२०११ दिनाङ्कं यावत् पूणेजनपदस्थे भोरग्रामे सम्पन्नम्।

**मनोविज्ञानसङ्गणकप्रयोगशालयोः उद्घाटनम्** – शिक्षादिवसे ११.११.११ दिनाङ्के शिक्षाविभागाध्यक्षाणां डॉ. मदनमोहन झा महोदयानां सङ्कल्पनेन आचार्य प्रकाशचन्द्र-महोदयस्यानामाध्वर्यवे शिक्षाशास्त्रविभागे मनोविज्ञानप्रयोगशाला, सङ्गणकप्रयोगशाला च समारब्धे। प्रयोगशालयोः अनयोः समुद्घाटनं परिसरस्य प्राचार्येणः आचार्य-अर्कनाथचौधरीमहोदयेन, के.जे.सोमैयाप्रशिक्षमहाविद्यालयस्य प्राचार्यया डॉ. वसुन्धरापद्मनाभन्महाभागया, केन्द्रीयविद्यालयप्राचार्येण डॉ. एन्.डि.ज्योषिवर्येण च विहितम्। कार्यक्रमेऽस्मिन् सर्वे परिसरीयच्छात्राः शिक्षकाः च भागमवहन्।



प्रयोगशालयोः उद्घाटनं कुर्वन्तः सुधियः

## श्रीरणवीरपरिसरस्य गतिविधयः

**स्वातन्त्र्यदिवसोत्सवः** – १५.०८.२०११ दिनाङ्के स्वातन्त्र्यदिवसमुपलक्ष्य परिसरप्राङ्गणे ध्वजारोहणकार्यक्रमस्यायोजनं कृतम्। आयोजनेऽस्मिन् दर्शनविभागाध्यक्षेण आचार्यवैद्यनाथझामहोदयेन समस्तपरिसरपरिवारसमेतेन ध्वजारोहणं विधाय समुद्बोधनमनुविहितम्।

**विभागीयपरिषदः समायोजनम् अनौपचारिकसंस्कृतशिक्षणस्य उद्घाटनं च** – १६.०८.२०११ दिनाङ्के अधिपरिसरं साहित्यव्याकरणप्रभृतीनां सर्वेषां विभागानां विभागीयपरिषदामायोजनं कृतं, यासु छात्रैः सोत्साहं भागग्रहणं विहितम्। अस्मिन्नेवावसरे अनौपचारिकसंस्कृतशिक्षणस्य प्रथमद्वितीययोः दीक्षयोरुद्घाटनसमारोहोऽप्यायोजितः। परिसरप्राचार्यः प्रान्तीयसंयोजकश्च आचार्यविश्वमूर्तिशास्त्री समारोहस्याध्यक्षतामधितिष्ठन् द्वयोरपि दीक्षयोरुद्घाटनं व्यधात्। साहित्यविभागाध्यक्षे डा. सतीशकपूरः समारोहेऽस्मिन् मुख्यातिथित्वेनोपस्थितः। सुश्री नीतूशर्मा, श्रीपुष्पेन्द्रजोशी च दीक्षाशिक्षकत्वेन, श्रीधनञ्जयमिश्रश्च संयोजकत्वेन न्ययुज्यन्त।



संस्कृतदिवसावसरे देव्याः सरस्वत्याः समार्चनं कुर्वन्तः विद्वांसः अतिथयश्च

**संस्कृतदिवसकार्यक्रमः** – १८.०८.२०११ दिनाङ्के संस्कृतदिवससमुपलक्ष्य संस्कृतसप्ताहोपलक्ष्य द्विदिवसीयसंस्कृत-कार्यक्रमस्यायोजनं प्रारब्धम्। परिसरप्राचार्यः विश्वमूर्तिशास्त्री कार्यक्रमेऽस्मिन् अध्यक्षरूपेण, जम्मूविश्वविद्यालयस्य संस्कृतविभागाध्यक्षचरी आचार्या वेदकुमारी घई मुख्यातिथिरूपेण, आचार्यरामप्रतापशुक्लश्च विशिष्टातिथिरूपेण समुस्थिताः। अस्मिन् कार्यक्रमे संस्कृतभाषण-वादविवाद-श्लोकपाठ-श्लोकान्त्याक्षरी-प्रभृतीनां विविधप्रतिस्पर्धानामायोजनं विहितम्। स्पर्धास्वेतासु विद्यार्थिनः सोत्साहं भागमगृह्णन्। १९.०८.२०११ दिनाङ्के संस्कृतसप्ताहस्य सम्पन्नतात्मके जम्मूकाश्मीरराज्यस्य शिक्षामन्त्रिचरो माननीयः श्रीहर्षदेवसिंहो मुख्यातिथित्वेनोपस्थितः। प्रान्तात् परिसरमुपेयुषां संस्कृताविदुषां सश्रीफलप्रशस्तिपत्रप्रदानपूर्वकं सम्माननमस्मिन्नवसरे विहितं मुख्यातिथिना। सममेव विद्यार्थिभ्यः पुरस्कारवितरणमप्यकारि। मञ्चसचालनम् आचार्यवैद्यनाथझामहोदयेन कृतम्। अस्मिन् कार्यक्रमे संस्कृतकविगोष्ठी अपि आयोजिता, यस्यां चतुर्दशभिः कविभिः काव्यपाठः कृतः। कविगोष्ठीसञ्चालनं डा. सतीशकपूरेण धन्यवादज्ञापनम् आचार्येण एम्.चन्द्रशेखरेण च कृतम्।



पुरस्कारं प्रयच्छन् भू.पू. मन्त्री प्राचार्यश्च




सम्पूर्तिसमारोहे भाषमाणः परिसरप्राचार्यः विश्वमूर्तिशास्त्री

# भोपालपरिसरवार्ता

**शैक्षिकसत्रारम्भसमारोहः** – भोपालपरिसरस्य शैक्षिकसत्रारम्भकार्यक्रमः ०४.०७.११ दिनाङ्के वैदिकमन्त्रोच्चारणैः सारस्वतवन्दनया च साकमभूत्। कार्यक्रमेऽस्मिन् विशिष्टातिथित्वेन संस्कृतभारत्याः संघटनमन्त्री श्रीजयप्रकाशगौतमः, मुख्यातिथिरूपेण बरकत-उल्लाहविश्वविद्यालयस्य शिक्षाशास्त्रविभागाध्यक्षः डा. एच. एस. त्रिपाठी, अध्यक्षत्वेन परिसरप्राचार्यः आजादमिश्रश्चासन्।

**संस्कृतसप्ताहसमारोहः** – भोपालपरिसरे सप्ताहव्यापिनि संस्कृतसप्ताहसमारोहमाधृत्य विविधकार्यक्रमाः समायोजिताः। संस्कृतसप्ताहसमारोहस्य शुभारम्भः १०.०८.११ दिनाङ्के जातः। उद्घाटनसमारोहे मुख्यातिथिरूपेण महर्षिपतञ्जलिसंस्कृतसंस्थानस्य सभापतिः आचार्यः मिथिलाप्रसादत्रिपाठी, अध्यक्षत्वेन आरक्षिमहानिदेशकचरः श्रीसुभाषत्रिपाठी, सारस्वतातिथिरूपेण जयपुरपरिसरस्य साहित्यविभागाध्यक्षचरः आचार्यकृष्णचन्द्रचतुर्वेदी च आसीत्। अवसरेऽस्मिन् संस्कृतविकासाय समर्पिताः मनीषिणः सम्मानिताः।



संस्कृतसप्ताहाङ्गतया आयोजितायाः क्रीडास्पर्धायाः किञ्चन दृश्यम्

१७.०८.११ दिनाङ्के समापनसमारोहः सुसम्पन्नः। संस्कृतसप्ताहे छात्राणां सर्वविधविकासार्थं शैक्षिक-सांस्कृतिक-क्रीडादिस्पर्धाः सुसम्पन्नाः। शैक्षिकस्पर्धान्तर्गते कनिष्ठ-वरिष्ठवर्गयोः व्याकरण-साहित्य-न्याय-सांख्य-मीमांसा-वेदान्त-धर्मशास्त्र-ज्योतिष-शिक्षाशास्त्र-अन्त्याक्षरी-समस्यापूर्ति-संस्कृतसम्भाषणविषयत्वेन आहत्य त्रयोदशशैक्षिकशास्त्रीयप्रतिस्पर्धाः ११-१२.०८.११ दिनाङ्कयोः सुसम्पन्नाः। सांस्कृतिकस्पर्धान्तर्गते संस्कृतसुभाषितकण्ठपाठ-वादविवाद-स्फूर्तिसाहित्यरचना-सङ्गणकीयसंस्कृत-आशुचित्रण-व्यंग्यचित्र-भित्तिपत्रक-रङ्गवल्ली-एकलसंस्कृतगीत-एकलशास्त्रीयगायन-एकलशास्त्रीयवादन-एकलशास्त्रीनृत्य-एकपात्राभिनय-संघनृत्यादयः इमाः पञ्चदशसांस्कृतिकस्पर्धाः आयोजिता अभूवन्। क्रीडाप्रतियोगितायां धावन-कबड्डी-शतरञ्ज-उच्चकूर्दन-लम्बकूर्दन-बैडमिण्टन-हस्तकन्दुक-खो-खो-योग-मल्ल-गोलक्षेपण-चक्रक्षेपण-कुन्तकक्षेपणादयः त्रयोदशक्रीडा-प्रतिस्पर्धाः सम्पूर्त्तिं गताः।




संस्कृतसप्ताहसमारोहे मञ्चासीनाः विद्वांसः

**स्वतन्त्रतादिवससमारोहः** – भोपालपरिसरे १५.०८.११ दिनाङ्के स्वातन्त्र्यदिवससमारोहः समर्चितः। राष्ट्रियपावनावसरे परिसरप्राचार्येण आजादमिश्रेण ध्वजारोहणं कृतम्। सः स्वातन्त्र्यनायकानाम् उल्लेखपुरस्सरं संस्कृतस्य स्वातन्त्र्यसंग्रामे योगदानं प्रख्यापितवान्।



स्वातन्त्र्यदिवसावसरे सभां सम्बोधयन् प्राचार्यः आजादमिश्रः

**डा. राधाकृष्णन् स्मृतिव्याख्यानमालाकार्यक्रमः** – ०५.०९.११ दिनाङ्के भोपालपरिसरस्य भवभूतिप्रेक्षागारे तृतीयो डा. राधाकृष्णन् स्मृतिव्याख्यानमालाकार्यक्रमः समायोजितः। व्याख्यानमालाकार्यक्रमस्यास्य विषयः आसीत् अवस्थितेरद्वितीयो बोधः – संस्कृतवाङ्मयं भर्तृहरिनीतिशतकञ्चेति। भोपालपरिसरप्राचार्यस्य आजादमिश्रस्याध्यक्ष्ये प्रवृत्तेऽस्मिन् कार्यक्रमे भोपालनगरस्य वरिष्ठः साहित्यकारः आचार्यः रमेशचन्द्रशाहः व्याख्यानं विहितवान्।

**स्थापनादिवससमारोहः** – १६.०९.११ दिनाङ्के भोपालपरिसरस्य स्थापनादिवसमहोत्सवः समाचरितः। परिसरस्य भवभूतिप्रेक्षागारे समासमायोजितेऽस्मिन् स्थापनादिवसमहोत्सवकार्यक्रमे मुख्यातिथित्वेन बरकतउल्लाहविश्वविद्यालयस्य संस्कृतविभागाध्यक्षः आचार्यः क्षेत्रवासीपण्डा अध्यक्षत्वेन परिसरप्राचार्यः आजादमिश्रः च सभां समलंकृतवन्तौ। अवसरेऽस्मिन् परिसरच्छात्रैः जयदेवप्रणीतं प्रसन्नराघवम् अभिनीतम्।

**अधिराज्यीयस्पर्धाः** – भोपालपरिसरे अक्टूबरमासस्य एकादशद्वादशदिनाङ्कयोः अधिराज्यीयशास्त्रीयस्पर्धाः समायोजिताः। मध्यप्रदेशछत्तीसगढ-राज्ययोः संस्कृतमहाविद्यालयानां प्रतिभागिनः अत्र भागं गृहीतवन्तः। स्पर्धानामुद्घाटनसमारोहे भारतसर्वकारस्य पूर्वकेन्द्रीयमन्त्री डॉ. (श्रीमती) सरोजिनी महिषी मुख्यातिथित्वेन, राष्ट्रियसंस्कृतसंस्थानस्य लखनऊपरिसरस्य प्राचार्यचरः आचार्य उमारमणझा कार्यक्रमस्य अध्यक्षत्वेन उपस्थितौ आस्ताम्। संस्थानकुलसचिवः आचार्यः के. बी. सुब्बरायुडुः कार्यक्रमे सारस्वतातिथिरूपेण केन्द्रीयलोकनिर्माणविभागस्य अधीक्षणाभियन्ता श्री आर्.आर्. पाटिलः विशिष्टातिथिरूपेण उपस्थितौ आस्ताम्। अवसरेऽस्मिन् राष्ट्रपतिपुरस्कारेण सम्मानितः विद्वान् डॉ. नोदनाथमिश्रोऽपि उपस्थितः आसीत्।




स्पर्धाकार्यक्रमे भाषमाणा श्रीमती (डा.) सरोजिनी महिषी

**कालिदासजयन्तीसमारोहः** – ०८.११.११ दिनाङ्के परिसरेऽस्मिन् पूर्वविधायकस्य श्री पी.सी.शर्ममहोदयस्य मुख्यातिथित्वे परिसरप्राचार्य प्रो. आजादमिश्रस्य आध्यक्षे च कालिदासजयन्तीसमारोहः वैदिकमन्त्रोच्चारणपूर्वकं समारब्धः। अवसरेऽस्मिन् छात्रैः संस्कृतगीतानां कालिदासीयश्लोकानां सुमधुरप्रस्तुतिः दत्ता। प्रो. विद्यानन्दझा, डॉ. वेदनारायणचौधरी, डॉ. सनन्दनत्रिपाठी, डॉ. हंसधरझा च कालिदासस्य व्यक्तित्त्वं कृतित्त्वं चाधृत्य वैदुष्यपूर्णानि व्याख्यानानि कृतवन्तः।



विद्युदुपकेन्द्रारम्भस्य किञ्चन दृश्यम्

**शिक्षादिवसः** – नवम्बरमासे परिसरस्य शिक्षाशास्त्रविभागे भारतस्य प्रथमशिक्षामन्त्रिणः मौलाना-अब्दुलकलामाजादस्य जन्मदिवसोपलक्ष्ये 'शिक्षादिवसः' समायोजितः। डॉ. वेदनारायणचौधरीमहोदस्य आध्यक्षे आयोजितेऽस्मिन् शिक्षादिवसे डॉ. जे. भानुमूर्तिः, डॉ. प्रभादेवी चौधरी श्रीरमणमिश्रश्च स्वविचारान् प्रकटितवन्तः। शिक्षाशास्त्रिछात्रेष्वपि कैश्चित् छात्रैः 'शिक्षायाः वर्तमानस्थितिः' इत्यस्मिन् विषये स्वकीयविचाराः उपस्थापिताः।

**बालचरप्रशिक्षणम्** – परिसरस्यास्य शिक्षाशास्त्रिछात्राणां दिसम्बरमासस्य सप्तमदिनाङ्कात् त्रयोदशदिनाङ्कं यावत् गांधीनगरे भोपाले आवासीयबालचरप्रशिक्षणं सम्पन्नम्। अस्य संयोजनं डॉ. प्रभादेवीचौधरी, डॉ. नितिनजैनः श्रीरमणमिश्रादयः प्राध्यापकाः विहितवन्तः।

**विद्युदुपकेन्द्रारम्भः** – दिसम्बरमासस्य षोडशदिनाङ्के भोपालपरिसरे स्थायिविद्युन्निबन्धनं सञ्जातम्। अवसरेऽस्मिन् प्राचार्यः प्रो. आजादमिश्रः छात्राश्च विद्युदुपकेन्द्रस्य बृहद्विद्युत्परिवर्तकयन्त्रस्य च पूजनेन समारम्भं विहितवन्तः। अनेन निबन्धनेन परिसरोऽयमधिकविद्युद्भारयुक्तोपकरणानां सञ्चालने स्थायिरूपेण सामर्थ्यमवाप्नोदिति।

**सङ्गणकप्रशिक्षणम्** – परिसरस्य आन्तरिकगुणवत्ताश्वासनप्रकोष्ठेन दिसम्बरमासस्य त्रयोविंशतिदिनाङ्कात् सप्तविंशतिदिनाङ्कं यावत् परिसराध्यापकेभ्यः सङ्गणकप्रशिक्षणस्य आयोजनं कृतम्। प्रशिक्षणेऽस्मिन् विशेषतया कक्षाशिक्षणे ऊर्जाबिन्दुप्रस्तुतिकरणस्य प्रयोगविषये अवधानः प्रदत्तः।

## श्रीवेदव्यासपरिसरस्य कार्यक्रमाः

**हिन्दीदिवससमारोहः** – परिसरेऽस्मिन् १३-१४.०९.२०११ इत्येतयो दिनाङ्कयोः हिन्दीदिवसकार्यक्रमः समायोजितः। १३.०९.२०११ दिनाङ्के छात्रस्तरीया हिन्दीभाषणस्पर्धा, कर्मचारिस्तरीया हिन्दीभाषणस्पर्धा च समायोजिते। तत्र आध्यक्ष्यं साहित्यविभागाध्यक्षेण डा. विजयपालशास्त्रिणा, सञ्चालनं डा. राधावल्लभशर्मणा च विहितम्। १४.०९.२०११ तमे दिनाङ्के प्रातः १०:३० वादने हिन्दीदिवसकार्यक्रमः समायोजितोऽभूत्।



स्थापनादिवससमारोहे वेदिकाम् अलंकुर्वाणः विद्वांसः अतिथयश्च

**स्थापनादिवससमारोहः** – राष्ट्रियसंस्कृतसंस्थानस्य गरलीपरिसरस्य १४तमः स्थापनादिवससमारोहः १६.०९.२०११ दिनाङ्के पूर्वाह्णे १०:३० वादने प्राचार्यस्य हरेकृष्णमहापात्रस्य आध्यक्ष्ये समजनि। तत्र मुख्यातिथित्वेन कुलसचिवः आचार्यः के. बी. सुब्बरायुडु समुपस्थितः आसीत्। कार्यक्रमसञ्चालनं डा. विजयपालशास्त्रिणा विहितम्। विशिष्टातिथयः प्रागपुरविधानसभायाः विधायकः श्रीयोगराजः, श्री अशोककुमारः (केन्द्रीयनिर्माणविभागस्य (CPWD) सहायकाभियन्ता), श्रीगगनदीपसिंह, (केन्द्रीय निर्माणविभागस्य (CPWD) वास्तुकारः) प्रागपुरपञ्चायतस्य प्रधानः श्रीरूपेन्द्रसिंहडैनी, आचार्यरामनारायणदासश्च आसन्।

**वेदान्तविभागस्य समुद्घाटनोत्सवः** – ०१.०७.२०११ दिनाङ्के परिसरे संस्थानकुलसचिवस्य आचार्यस्य के.बी. सुब्बरायुडुमहोदयस्य करकमलाभ्यां वेदान्तविभागस्य समुद्घाटनं समजनि। उत्सवेऽस्मिन् कुलसचिवमहोदयः अद्वैतवेदान्तस्य अनुपममवैशिष्ट्यं प्रतिपादयन् शास्त्रस्यास्य अद्वितीयतां प्रादर्शयत्।

**संस्कृतसम्भाषणशिबिरम्** – परिसरेण ०४.०७.२०११ तः १८.०७.२०११ यावत् संस्कृतसम्भाषणशिबिरं समनुष्ठितम्। शिबिरस्यास्य उद्घाटनं ०४.०७.११ दिनाङ्के समपद्यत। कार्यक्रमेऽस्मिन् संस्कृतभारत्याः हिमाचलप्रान्तस्य प्रमुखः श्रीनरेन्द्रकुमारः मुख्यातिथित्वेन समागतः आसीत्। डा. विजयपालशास्त्री अस्य शिविरस्य निर्देशकः आसीत्। डा. सुबोधशर्मा, डा. अशोकचन्द्रगौडशास्त्री, डा. विष्णुकुमारनिर्मलः, डा. सुज्ञानकुमारमाहान्तिः, श्रीमतीगौरप्रियादाश, डा. किशोरकुमारदलाई, डा. नन्दकिशोरतिवारी, डा. राधावल्लभशर्मा, डा. मनोजश्रीमालः, श्रीअनिलप्रतिहस्तः, श्रीअरुणकुमारशर्मा, श्रीभानुशर्मा प्रभृतयः प्राध्यापकाः छात्रान् संस्कृतसम्भाषणकौशलं पाठितवन्तः। १८.०७.२०११ दिनाङ्के शिबिरस्यास्य समापनसमारोहः सम्पन्नः। तत्र कागडातः डी. ए. वी. महाविद्यालयस्य संस्कृतविभागस्य आचार्यः मनोहरलालार्यः समुपस्थाय मधुराभिः संस्कृतकाव्यपंक्तिभिः छात्राणाम् अध्यापकानां च आनन्दं समवर्धयत्।



संस्कृतसप्ताहकार्यक्रमस्य किञ्चन दृश्यम्

**संस्कृतसप्ताहसमारोहः** – १०.०८.२०११ दिनाङ्के संस्कृतसप्ताहसमारोहः उद्घाटितः। तस्मिन् समारोहं मुख्यातिथिः संस्कृतभारत्याः चतुःप्रान्तीयसंयोजकः श्रीमान् प्रतापः आसीत्। परिसरप्राचार्यः हरेकृष्णमहापात्रः अध्यक्षः, मुख्यवक्ता साहित्यविभागाध्यक्षः डा. विजयपालशास्त्री च आसीत्। १६.०८.२०११ दिनाङ्के संस्कृतसप्ताहस्य समापनं सञ्जातम्। तस्मिन् मुख्यातिथिः सनातनधर्मादर्शसंस्कृतविद्यालयस्य डोहगीस्थस्य प्राचार्यः डा. भक्तवत्सलः आसीत्। अध्यक्षः परिसरप्राचार्यः हरेकृष्णमहापात्रः, मुख्यवक्ता व्याकरणविभागाध्यक्षः डा. सुबोधशर्मा च अवर्तन्त। 'संस्कृतभाषायाः महत्त्वं न केवलं सैद्धान्तिकरूपेण ज्ञेयमपितु तस्याः साम्प्रतिके युगे काऽस्ति प्रायोगिकता इत्यपि साक्षात्कृत्य प्रदर्शनीयमिति मुख्यातिथिः डा. भक्तवत्सलः स्ववक्तव्यमुपास्थापयत्।'

**स्वतन्त्रतादिवसकार्यक्रमः** – १५.०८.२०११ दिनाङ्के भारतस्य पञ्चषष्टितमस्य स्वतन्त्रतादिवसस्य आयोजनं गरलीपरिसरेण सोत्साहं कृतम्। अस्मिन् कार्यक्रमे बहवः छात्राः राष्ट्रभक्तिगीतानि प्रास्तुवन्। परिसरप्राचार्यः हरेकृष्णमहापात्रः ध्वजारोहणं कृत्वा विद्यार्थिनः, अध्यापकान् सर्वान् च समबोधयत्।

**अनौपचारिकसंस्कृतशिक्षणकेन्द्रस्य समापनसमारोहः** – अगस्तमासे उद्घाटितस्य अनौपचारिकसंस्कृतशिक्षणकेन्द्रस्य समापनसमारोहः गरलीस्थ-वेदव्यासपरिसरेण प्रान्तीयसंयोजकस्य डॉ. भक्तवत्सलस्य परामर्शेन परिसरस्य मुख्यभवने समायोजितः। अस्य कार्यक्रमस्याध्यक्षं परिसरस्य प्राचार्येण प्रो. हरेकृष्णमहापात्रेण अकृत। अवसरेऽस्मिन् मुख्यातिथित्वेन गरलीस्थराजकीयकन्योच्चविद्यालयस्य संस्कृताध्यापकः डॉ. रविन्द्रशर्मा, विशिष्टातिथिरूपेण योगशिक्षकः श्रीशक्तिसिंहश्च आस्ताम्।




महिलासंस्कृताध्ययनकेन्द्रारम्भस्य अवसरे मञ्चासीनाः विद्वांसः

**समायोजिता गीताकण्ठपाठस्पर्धा** – परिसरे महिलासंस्कृताध्ययनकेन्द्रस्य तत्त्वावधाने कर्मयोगस्य शिक्षां प्रदातुं ३०.११.२०११ दिनाङ्के गीताकण्ठपाठस्पर्धा समायोजिता। स्पर्धायामस्यां द्वौ वर्गौ कनिष्ठः, वरिष्ठश्च आस्ताम्। कनिष्ठवर्गे षष्ठीकक्षातः द्वादशकक्षापर्यन्तम्, वरिष्ठवर्गे स्नातकप्रथमवर्षादारभ्य स्नातकोत्तरपर्यन्तं विद्यमानाः छात्राः भागम् अग्रहीषुः। अस्यां प्रतियोगितायां विभिन्नेभ्यः विद्यालयेभ्यः महाविद्यालयेभ्यश्च छात्राः भागं गृहीतवन्तः।

**समुद्घाटितं महिलासंस्कृताध्ययनकेन्द्रम्** – राष्ट्रियसंस्कृतसंस्थानस्य कुलपतेः आचार्यस्य राधावल्लभत्रिपाठिनः दिव्यानुग्रहेण संस्थानस्य कुलसचिवस्य प्रो. के.बी. सुब्बरायुडुमहाभागस्य करकमलाभ्यां महिलासंस्कृताध्ययनकेन्द्रं दिसम्बरमासस्य तार्तीयीके दिनाङ्के समुदघाटि।

## जयपुरपरिसरोदन्तः

**आचार्यरामानुजदेवनाथस्याभिनन्दनम्** – ०९.०७.२०११ दिनाङ्के संस्थानस्य कुलसचिवचरस्य जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयस्य कुलपतेः आचार्यरामानुजदेवनाथस्य अभिनन्दनसमारोहः परिसरे समायोजितः। अस्मिन् अभिनन्दनसमारोहे संस्थानस्य कुलपतिः आचार्यराधावल्लभत्रिपाठी राजस्थानस्य प्रथितविद्वान् आचार्यदयानन्दभार्गवः परिसरप्राचार्यश्च अर्कनाथचौधरीः समुपस्थिताः आसन्। अवसरेऽस्मिन् 'जयन्ती' इति वार्षिकपत्रिकायाः अष्टमपुष्पस्य, परिसरसन्देशस्य तृतीयाङ्कस्य, डा. रामकुमारशर्मप्रणीतस्य खण्डकाव्यस्य वृक्कयौतुकम् इत्यस्य च विमोचनम् अभवत्।




संस्कृतसप्ताहावसरे वेदिकासीना विद्वांसः

**संस्कृतसप्ताहमहोत्सवः** – ०७.०८.११ तः ११.०८.११ दिनाङ्कं यावत् परिसरेण प्रतिवर्षमिव संस्कृतसप्ताहमहोत्सवः आचरितः। उद्घाटनकार्यक्रमे मुख्यातिथिरूपेण राजस्थानसर्वकारस्य चिकित्साराज्यमन्त्री डा. राजकुमारशर्मा समागतः। अवसरेऽस्मिन् पं. मोतीलाल जोशी, प्रो. हरिरामाचार्यः, पं. प्यारेमोहनशर्मा, पं. मोहनलालशर्मपाण्डेयः, प्रो. दीक्षितपुष्पा, श्रीसत्यनारायणशास्त्री, डा. राजेश्वरीभट्टश्च सम्मानिताः। परिसरेण सप्ताहेऽस्मिन् परिसरस्थ विविधशास्त्रचार्याणां विशिष्टव्याख्यानानि अपि आयोजितानि। विशिष्टव्याख्यानमालायाः उद्घाटनसत्रे प्राचार्यः व्याकरणमधिकृत्य व्याख्यानं प्रास्तौत्। प्रतिदिनं शास्त्रद्वये व्याख्यानम् अभवत्।



संस्कृतसप्ताहावसरे भाषमाणः मन्त्रिवर्यः डा. राजकुमारशर्मा

**व्याकरणकार्यशाला** – २७.०७.११ तः २६.०८.११ दिनाङ्कं यावत् परिसरे व्याकरणकार्यशालायाः आयोजनमभूत्। कार्यशालायाम् अध्यापयितुम् आचार्या दीक्षितपुष्पा समागता।



‘अन्यच्च’ उपन्यासमधिकृत्य भाषमाणः आचार्यः रामानुजदेवनाथः

आचार्यया महता परिश्रमेण सश्रद्धञ्च मासैकपर्यन्तं छात्राः प्राध्यापकाश्च प्राध्यापिताः। परिसरस्य विविधकक्ष्यायाः छात्राः कार्यशालामस्यां व्याकरणस्य अष्टाध्यायीक्रमेण अध्ययनमकार्षुः। २८.०८.११ दिनाङ्के कार्यशालायाः अस्याः समापनमभवत्। समापनसमारोहेऽस्मिन् संस्थानकुलपतिः प्रो. राधावल्लभत्रिपाठी, प्रो. अभिराजराजेन्द्रमिश्रः, आचार्या दीक्षितपुष्पा, प्रो. हरिरामाचार्यः, डा. वाई.एस्. रमेशः, परिसरप्राचार्यः प्रो. अर्कनाथचौधरी च समुपस्थिताः आसन्।

**‘अन्यच्च’ इत्युपन्यासमधिकृत्य परिसंवादः** – २८.०८.११ दिनाङ्के राष्ट्रिसंस्कृतसंस्थानस्य जयपुरपरिसरः सरस्वतीप्राच्यविद्याशोधप्रतिष्ठानं जयपुरञ्चेत्यनयोः संयुक्तोपक्रमे परिसरे परिसंवादः समायोजितः।

**राष्ट्रिया संगोष्ठी** – जयपुरपरिसरेण १२.१०.२०११ तः १४.१०.२०११ पर्यन्तं दिवसत्रयव्यापिनी राष्ट्रिया सङ्गोष्ठी समायोजिता। सङ्गोष्ठ्या अस्याः समुद्घाटनं १२.१०.११ दिनाङ्के प्रातः दशवादने परिसरस्थ–डॉ. हिन्दकेसरीसभागारे संस्थानकुलसचिवस्य आध्यक्ष्ये, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य प्राक्तनकुलपतेः प्रो. अभिराजराजेन्द्रमिश्रस्य मुख्यातिथित्वे, प्रो. प्रभुनाथद्विवेदिवर्यस्य सारस्वतातिथित्वे, प्रो. रमाकान्तशुक्लस्य विशिष्टातिथित्वे, प्रो. हरिरामाचार्यस्य सम्मान्यातिथित्वे, प्रो. अर्कनाथचौधरीमहोदयस्य च संरक्षकत्वे, डॉ. रमाकान्तपाण्डेयस्य संयोजकत्वे सम्पन्नतां यातः।




राष्ट्रियसंगोष्ठ्यां मञ्चासीनाः विद्वांसः

१४.१०.११ दिनाङ्के सभागारे विशिष्टं सत्रं सम्पन्नतां गतम्। प्रो. रामानुजदेवनाथः, प्रो. राजेन्द्रमिश्रश्च सत्रस्यास्य आध्यक्षपदं निर्व्यूढवन्तौ। तस्मिन्नैव दिने अपराह्णे द्विवादने सम्पूर्तिसत्रम् आयोजितमभूत्। सत्रेऽस्मिन् वेदिकायां मुख्यातिथित्वेन समुपस्थितः आसीत् जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. रामानुजदेवनाथः, सारस्वतातिथित्वेन राष्ट्रपतिसम्मानितो विद्वांन् देवर्षिकलानाथशास्त्री मञ्चे उपविष्ट आसीत्। विशिष्टातिथित्वेन प्रो. वाचस्पतित्रिपाठी, सम्मान्यातिथित्वेन व्याकरणशास्त्रविदुषी प्रो. पुष्पादीक्षितमहोदया, अध्यक्षत्वेन परिसरप्राचार्यः प्रो. अर्कनाथचौधरी चासन्। कार्यक्रमस्यास्य सञ्चालनं डॉ. रमाकान्तपाण्डेयेन कृतम्।




कविसमवाये काव्यं प्रस्तुवन् डा. रमाकान्तशुक्लः

## शृङ्गेरीपरिसरस्य वार्ताः

**मुक्तस्वाध्यायपीठवार्ता** – ११.०७.२०११ तः २५.०७.११ पर्यन्तं प्राक्शास्त्रि–शास्त्रि–आचार्यकक्ष्याणां छात्रेभ्यः सम्पर्ककक्ष्याः सञ्चालिताः। २४.०८.११ आचार्यप्रवेशपरीक्षा संवृत्ता।

**युवमहोत्सवे उपलब्धयः** – ऐषमः राष्ट्रियसंस्कृतसंस्थानस्य जम्मूस्थ–रणवीरपरिसरे प्रवृत्ते युवमहोत्सवे सर्वाधिकान् ३९५ अङ्कान् प्राप्य शृङ्गेरीस्थराजीवगान्धीपरिसरः “युववैजयन्तीम्” समासादयत्। विजेतृन् छात्रान् वर्धापयितुं परिसरे अभिनन्दनकार्यक्रमः समायोजितः।

**शिक्षाशास्त्रिकक्षायाः सत्रस्य उद्घाटनकार्यक्रमः** – ०१.०७.११ दिनाङ्के शिक्षाशास्त्रिकक्षायाः सत्रोद्घाटनकार्यक्रमः प्राचलत्। बी. जी. एस. बी. एड. कालेज प्राचार्यः के. सी. नागेशः कार्यक्रमेऽस्मिन् अभ्यागतत्वेन समागतः।

वाग्वर्धिनीपरिषदः शारदाविशिष्टव्याख्यानमालायाश्च उद्घाटनसमारोहः – ०७.०७.११ दिनाङ्के जयपुरस्थ–श्रीजगद्गुरुरामानन्दाचार्यसंस्कृतविश्वविद्यालयस्य कुलपतिः आचार्यः रामानुजदेवनाथः वाग्वर्धिनीपरिषदः शारदाविशिष्टव्याख्यानमालायाश्च उद्घाटनं विधाय चिन्तनविषये व्याख्यानमकरोत्।




अध्यापकवाक्यार्थपरिषदः किञ्चन दृश्यम्

**अध्यापकवाक्यार्थपरिषदः प्रथमाधिवेशनम्** – १९.०७.२०११ दिनाङ्के अध्यापकवाक्यार्थपरिषदः प्रथमाधिवेशनं परिसरप्राचार्यस्य वी. कुटुम्बशास्त्रिणः आध्यक्ष्ये प्रवृत्तम्। तत्र डा. महाबलेश्वरभट्टः, डा. सुब्राय वी. भट्टः, डा. चन्द्रकान्तः, डा. नवीनहोल्लश्च स्वस्वशास्त्रे वाक्यार्थं विहितवन्तः।

**संवादः** – २०.०७.२०११ दिनाङ्के परिसरे वर्तमानसमये संस्कृतमिति विषयकः कश्चन परिसंवादकार्यक्रमः समायोजितः। अस्मिन् कार्यक्रमे संस्कृतभारत्याः महामन्त्री श्री च. मू. कृष्णशास्त्री देशे संस्कृतस्य वर्तमानकालिकीपरिस्थितीनां विषये उदबोधयत्।

**संस्कृतोत्सवः** – परिसरेऽस्मिन् दक्षिणाम्नाय श्रीशृङ्गेरीशारदापीठाधीश्वराणां भारतीतीर्थमहास्वामिनां करकमलाभ्यां १४.०८.२०११ दिनाङ्के ऐषमः संस्कृतोत्सवः समुदघाटि। कार्यक्रमे श्रीमहास्वामिभिः नैषधीयचरितश्लोकेन पुरा गैर्वाण्या गिरा संगिरन्ते स्म नरा इति प्रमाणीकृतम्। तैः सूचिता च नानादेशीयानां जनानामेकतायां संस्कृतस्य भूमिका। तद्दिने एव अपराह्णे समापनसमारोहः संप्रवृत्तः। अस्मिन् समापनसमारोहे जे. सी. बी. एम. महाविद्यालयस्य प्राध्यापकः डा. गिरिधरशास्त्री अभ्यागतत्वेन समागत्य छात्रान् समुदबोधयत्। अवसरेऽस्मिन् छात्रैः विविधाः स्पर्धाः सांस्कृतिककार्यक्रमेषु उत्साहपूर्वकं भागः विहितः।




संस्कृतोत्सवे भाषमाणः प्राचार्यः वी.कुटुम्बशास्त्री, पार्श्वे दृश्यन्ते भारतीतीर्थमहास्वामिनः

**स्वातन्त्र्योत्सवः** – १५.०८.२०११ दिनाङ्के प्रातः ८.३० वादनवेलायां परिसरे प्राचार्येण वेम्पटि कुटुम्बशास्त्रिणा ध्वजोत्तोलनं विहितम्। ततः आदिनं देशभक्तिपरकाः विविधाः सांस्कृतिककार्यक्रमाः समायोजिताः।

**अध्यापकवाक्यार्थपरिषदः द्वितीयाधिवेशनम्** – २३.०८.२०११ दिनाङ्के अध्यापकवाक्यार्थपरिषदः द्वितीयाधिवेशनम् आचार्यस्य पी. सच्चिदानन्दस्य आध्यक्ष्ये प्रवृत्तम्। तत्र डा. सी. एस. एस. एन. मूर्तिः, डा. हरिप्रसादः, डा. चन्द्रकलाकोण्डी डा. नवीनश्च स्वस्वशास्त्रे वाक्यार्थं विहितवन्तः।

**शारदाविशिष्टव्याख्यानमालायाः द्वितीयसम्मेलनम्** – २६.०८.२०११ दिनाङ्के संस्कृतमहापाठशालायाः साहित्यविभागाध्यक्षः डा. एन. लक्ष्मीनारायणभट्टः शारदाविशिष्टव्याख्यानमालायाः द्वितीयपुष्पं प्राफुल्लयत्।

**शारदाविशिष्टव्याख्यानमालायाः तृतीयसम्मेलनम्** – २६.०८.२०११ दिनाङ्के आचार्यः स्वामिनाथन् शारदाविशिष्टव्याख्यानमालायाः तृतीयाधिवेशनावसरे व्याख्यानं प्रास्तौत्।

**हिन्दीदिवससमारोहः** – १४.०९.२०११ दिनाङ्के परिसरे हिन्दीदिवससमारोहः समाचरितः। अस्मिन् कार्यक्रमे केरलस्य कालटिस्थ-श्रीशङ्कराचार्यसंस्कृतविश्वविद्यालयस्य प्राध्यापिका डा. शान्तिनायरवर्या अभ्यागतत्वेन समागत्य हिन्दीभाषाविषये स्वीयाशयं प्रकटितवती।

**अध्यापकवाक्यार्थपरिषदः तृतीयाधिवेशनम्** – २०.०९.२०११ दिनाङ्के अध्यापकवाक्यार्थपरिषदः तृतीयाधिवेशनं डा. राधावर्यायाः आध्यक्ष्ये प्रवृत्तम्। तत्र डा. आर. बालाजी, श्रीनाथवर्यः, डा. सुदर्शनचिपलूणकरश्च स्वस्वशास्त्रे वाक्यार्थं विहितवन्तः।

**शारदाविशिष्टव्याख्यानमाला** – ३१.१०.११ दिनाङ्के शारदाविशिष्ट-व्याख्यानमालायां ज्यौतिषव्याख्यानकुसुमं ज्यौतिषविदा मद्रपुरीस्थमैलापुर-संस्कृतकलाशालायाः ज्यौतिषाध्यापकचरेण पण्डितश्रीनारायणशर्मणा 'मलमासविचारः' इति विषये गम्भीरं व्याख्यानं प्रदाय प्रफुल्लितम्। प्राचार्यस्य प्रो. वे. कुटुम्बशास्त्रिणः आध्यक्ष्ये डॉ. रामचन्द्रुलबालाजी-डॉ.चन्द्रशेखरभट्टयोः संयोजकत्वे च कार्यक्रमोऽयं सुष्ठु सम्पन्नः।

१५.११.११ दिनाङ्के शारदाविशिष्टव्याख्यानमालायां व्याकरणव्याख्यानकुसुमं तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य व्याकरणचायेण प्रो. श्रीपादसत्यनारायणमूर्तिमहोदयेन 'स्फोटस्वरूपम्' इति विषये गम्भीरं व्याख्यानं प्रदाय प्रफुल्लितम्।




वाक्यार्थपरिषदि सभां सञ्चालयन्ती डा. चन्द्रकलाकोण्डि

**वाक्यार्थपरिषद्** – वाक्यार्थपरिषदः चतुर्थाधिवेशनम् आश्विनासितनवम्यां (२१.१०.२०११) विदुषा डा. महाबलेश्वर पि. भट्टस्य आध्यक्ष्ये प्राचलत्। अधिवेशनेऽस्मिन् डॉ. एस्. राधा – वक्रोक्तिजीवितप्रतिपादितं साहित्यम्, डॉ. कृष्णानन्तपद्मनाभः – आख्यातार्थः, डॉ. सूर्यनारायणभट्टः – नामधेयनिरूपणम्, डॉ. राघवेन्द्रभट्टः – अतिशयोक्त्यलङ्कारः, डॉ. वेङ्कटरमणभट्टः – अभ्यासविवेचनम् इत्येतान् विषयान् वाक्यार्थे प्रास्तुवन्।

वाक्यार्थपरिषदः पञ्चमाधिवेशनम् कार्तिककृष्णद्वादश्यां (२२.११.२०११) विदुषां डा. सुब्राय वि. भट्टस्य आध्यक्ष्ये सम्पन्नम्। अधिवेशनेऽस्मिन् डॉ. गणेश ईश्वरभट्टः – ज्ञाननिवर्त्यत्वेन बन्धमिथ्यात्वसिद्धिः, डॉ. रामचन्द्रजोयीस् – प्रतीकालङ्कारः, श्रीरामकृष्णपेजत्ताय – चन्द्रस्फुटीकरणम्, श्रीश्रिकर जि. एन्. – अद्वैतसिद्धौ प्रथममिथ्यात्वलक्षणम् च वाक्यार्थे उपास्थापयन्। संयोजकाभ्यां डॉ. चन्द्रकलाकोण्डि-डॉ. गणेशपण्डिताभ्याम् अधिवेशनद्वयं चारु चालितम्।



## श्रीसदाशिवपरिसरकार्यक्रमः

**संस्कृतसप्ताहः** – ऐषमः १२.०८.२०११ दिनाङ्के संस्कृतसप्ताहस्य उद्घाटनं समजायत। तत्र उद्घाटनोत्सवे उत्कलविश्वविद्यालयस्य संस्कृतविभागाध्यक्षः प्रो. राधामाधवदाशः सारस्वताभ्यागतत्वेन उपस्थाय सप्ताहममुं दीपप्रज्ज्वालनपुरस्सरं समुदघाटयत्। थाइलैण्ददेशप्रवासस्य अनुभूतिं स्मारं स्मारं संस्कृतस्य महत्त्वं संस्कृतस्य वैदेशिकभाषासु प्रभावः इत्यादिविषयान् सभामुखं समुदबोधयत्। परिसरप्राचार्यः डा. जि. गङ्गन्ना सभायाः आध्यक्ष्यं निरवहत्। धर्मशास्त्रविभागाध्यक्षः प्रो. अतुलकुमारनन्दः स्वागतं, शिक्षाशास्त्र-विभागाध्यक्षः डा. रमाकान्तमिश्रः धन्यवादं, श्री लक्ष्मीधरपण्डा सभासञ्चालनञ्च अकुर्वन्।

संस्कृतसप्ताहावसरे आचार्याय आर.देवनाथाय अभिनन्दनं कुर्वन् प्राचार्यः जी.गङ्गन्ना

१७.०८.२०११ दिनाङ्के समापनसमारोहे ज.रा.रा.सं.वि.विद्यालयस्य कुलपतिः आचार्यः रामानुजदेवनाथः मुख्यातिथित्वेन, प्राचार्यः अध्यक्षत्वेन, संयोजकः डा. सुकान्तकुमारसेनापतिः च मञ्चासीनाः आसन्। अवसरेऽस्मिन् परिसरप्राचार्यः जगत्सिंहपुरस्थाय पण्डितप्रवराय श्रीगोविन्दचन्द्रमिश्राय मानपत्रप्रदानेन सम्माननमकरोत्।

**शोभायात्रा** – परिसरप्राचार्यस्य आध्यक्ष्ये डा. रमाकान्तमिश्रस्य च मार्गदर्शने जनजागरणाय १६.०८.२०११ दिनाङ्के 'जयतु संस्कृतम्' इत्युद्घोषपुरस्सरं काचित् भव्या शोभायात्र समायोजिता। परिसरस्य सर्वे छात्राः अध्यापकाः कर्मचारिणश्च अस्यां शोभायात्रायां भागमवहन्। पुरीस्थाः नागरिकाः साश्चर्यं सोत्कण्ठं च अस्याः भव्यतां प्राशंसन्त।




संस्कृतशोभायात्रायाः किञ्चन दृश्यम्

**छात्रप्रातिभपाठ्यक्रमः** – ३०.०८.२०११ दिनाङ्के त्रिवादने वाणीविलासपरिषदः छात्रप्रातिभपाठ्यक्रमस्य उद्घाटनं आक्ष्यधीक्षकचरः श्रीसारङ्गधररायगुरुः अकार्षीत्। मुख्यवक्तृत्वेन श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य साहित्याविभागाध्यक्षः प्रो. प्रमोदकुमारमिश्रः, अध्यक्ष्यत्वेन प्राचार्यः डा. जि. गङ्गन्ना, मार्गदर्शकः डा. सुकान्तसेनापतिः मञ्चासीनाः आसन्। अयं हि पाठ्यक्रमः प्रतिदिनं ३-५ वादनपर्यन्तं चितानां प्रतिभाशालिच्छात्राणां बोधने दत्तावधानः भविष्यति। साहित्ये डा. सूर्यमणिरथः, भाषाशुद्धिविषये डा. रमाकान्तमिश्रः, व्याकरणे दुर्गाचरणषडङ्गी, वेदान्ते डा. भगवान सामन्तरायः, न्याये डा. गणपतिशुक्लः, ज्योतिषश्शास्त्रे डा. सत्यस्वरूपवाजपेयी, दर्शने श्रीनन्दिघोषमहापात्रः, धर्मशास्त्रे डा. प्रियरञ्जनरथः च तत्तद्विषयेषु निर्दिष्टसमये अध्यापयिष्यन्ति।

**व्याख्यानमाला** – शिक्षाशास्त्रविभागपक्षतः ऐषमः प्रथमव्याख्यानमाला परिसरे समायोजिता। तत्र तिरुपतिस्थस्य राष्ट्रियसंस्कृतविद्यापीठस्य शिक्षाशास्त्रविभागस्य वरिष्ठाचार्यः प्रो. वि.मुरलीधरशर्मा व्याख्यानमालायां 'प्राचीनभारतीयशिक्षायां विविधमूल्यानि' इति विषयमवलम्ब्य छात्रोचितशैल्या उदबोधयत्। कार्यक्रमस्य प्रारम्भे छात्राणां मङ्गलाचरणेन, डा. वृन्दावनपात्रस्य स्वागतेन, प्राचार्यस्य डा. जि. गङ्गन्नावर्यस्य आध्यक्ष्ये विभागाध्यक्षस्य डा. रमाकान्तमिश्रस्य धन्यवादार्पणेन कार्यक्रमः समाप्तिमगात्।

**वृक्षरोपणम्** – १५.०८.२०११ दिनाङ्के स्वातन्त्र्योत्सवदिवसे परिसरप्राचार्यस्य डा. गङ्गन्नामहोदयस्य मार्गदर्शनेन सर्वेषां कर्मचारिणां छात्राणां च माध्यमेन परिसरे वृक्षरोपणकार्यक्रमः समायोजितः।

**हिन्दीपक्षपालनम्** – पुरीपरिसरे 'हिन्दीपक्षः' ०१.०९.११ तः १४.०९.११ दिनाङ्कपर्यन्तं महता वैभवेन समायोजितः। तत्र प्राचार्यस्य आध्यक्ष्ये हिन्दी-अध्यापिकायाः डा. केतकीमहापात्रायाः तत्त्वावदानेन कार्यक्रमोऽयं समनुष्ठितः।




हिन्दीदिवसावसरे मञ्चासीनाः विद्वांसः

**सर्वदर्शनविभागस्य जातीयालोचनाचक्रम्** – सर्वदर्शनविभागपक्षतः अक्टोबरमासस्य २१ तः २२ दिनाङ्कं यावत् ''भारतीयदर्शनाभिमता ज्ञानमीमांसा'' इति विषये किञ्चन जातीयालोचनचक्रं समायोजितम्। प्रदीपप्रज्वालनपुरस्सरं राष्ट्रियसंस्कृतसंस्थानस्य कुलसचिवः प्रो. के.बी. सुब्बारायुडुमहोदयः जातीयालोचनाचक्रम् आनुष्ठानिकरूपेण उदघाटयत्। कार्यक्रमेऽस्मिन् मुख्यातिथित्वेन, तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य अद्वैतवेदान्तविभागस्य वरिष्ठाचार्यः प्रो. एम.एल.एन. मूर्त्तिः, मुख्यवक्तृत्वेन श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य सर्वदर्शनविभागस्य वरिष्ठाचार्यः प्रो. प्यारीमोहनपट्टनायकः विशिष्टातिथित्वेन जोधपुरस्थ-जयनाराणव्यासविश्वविद्यालयस्य वरिष्ठाचार्यः प्रो. श्रीकृष्णशर्मा, परिसरस्य प्राचार्यः डा. जि. गङ्गना च सभायाः उद्घाटनसत्रे भारतीयदर्शनाभिमता ज्ञानमीमांसा इति विषये स्वीयाभिप्रायान् प्राकटयन्।

२२.१०.२०११ दिनाङ्के आयोजिते समापनोत्सवे सुब्रत षडङ्गी मङ्गलाचरणम्, अध्यापकः नन्दिघोषमहापात्रः स्वागतभाषणञ्च अकुरुताम्। अत्र मुख्यातिथिरूपेण श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य अद्वैतवेदान्तविभागस्य वरिष्ठाचार्यः प्रो. प्रभातरञ्जनमहापात्रः, विशिष्टातिथित्वेन तस्यैव विश्वविद्यालयस्य परीक्षानियन्त्रकः प्रो. देवीप्रसन्नरथः, सम्मानितातिथित्वेन वेदव्यासपरिसरस्य प्राचार्य प्रो. हरेकृष्णमहापात्रः, मुख्यवक्तृरूपेण श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य न्यायविभागस्याध्यक्षः प्रो. कमलेश मिश्रः, परिसरप्राचार्यः डा. जि. गङ्गना कार्यक्रमस्यास्य आध्यक्षञ्च अकुर्वन्।



जातीयचर्चासत्रस्य किञ्चन दृश्यम्

**व्याकरणविभागीयं जातीयचर्चासत्रम् –** परिसरे व्याकरणविभागपक्षतः ''व्याकरणदर्शनम्'' इति विषये अक्टोबरमासस्य १२-१३ इति दिनद्वयव्यापि किञ्चन जातीयचर्चासत्रम् अजायत। तच्च १२.१०.२०११ दिनाङ्के राष्ट्रियसंस्कृतसंस्थानस्य कुलसचिवेन प्रो. के. बि. सुब्बारायुडुमहोदयेन प्रदीपप्रज्ज्वालनपुरस्सरमुद्घाटितम्। मुख्यातिथित्वेन जोधपुरस्थजयनारायणव्यासविश्वविद्यालयस्य संस्कृतविभागाध्यक्षः प्रो.श्रीकृष्णशर्मा, मुख्यवक्तृत्वेन वेदव्यासपरिसरस्य प्राचार्यः प्रो. हरेकृष्णमहापात्रः, सभापतित्वेन परिसरप्राचार्यः डा. गङ्गान्नामहोदयश्च सभामलमकुर्वन्।

१३ दिनाङ्के सायं ४.३० वादने चर्चासत्रस्य समापनसमारोहे मुख्यातिथित्वेन आचार्यः चन्द्रशेखरदाशः, विशिष्टातिथित्वेन प्रो. किश्वरचन्द्रपाढी, सम्मानितातिथित्वेन तिरुपतिविद्यापीठस्य व्याकरणविभागाध्यक्षः प्रो. जानमर्दिरामकृष्णवर्यः, मुख्यवक्तृत्वेन डा. के. वि. सोमयाजुलुः, अध्यक्षत्वेन परिसरप्राचार्यः डा. गङ्गान्ना च सभायामुपस्थिताः आसन्।

**राष्ट्रियशिक्षादिवसः –** नवम्बरमासस्य ११ दिनाङ्के भारतस्य प्रथमशिक्षामन्त्रिणः मौलाना अबुलकलामाजादस्य जन्मदिवसमालक्ष्य भारतसर्वकारेण घोषितः राष्ट्रियशिक्षादिवसः ऐदम्प्राथम्येन श्रीसदाशिवपरिसरस्थशिक्षाशास्त्रविभागपक्षतः परिपालितः। एतदङ्गभूततया ११ दिनाङ्के प्रातः शिक्षाशास्त्रीयच्छात्राणां कृते आजादवर्यस्य प्रियशैक्षिकविषयेषु भाषणप्रतियोगिताः, स्त्रीशिक्षामाधारीकृत्य वादविवादप्रतिगिताः च समायोजिताः। मध्याह्नोत्तरं समायोजिते सभाकार्यक्रमे बहुभिः विभागीयाध्यापकैः मौलानावर्यस्य विचाराः प्राकटिताः। स्वागतं डा. मदनकुमार झा, धन्यवादं डा. भरतकुमारपण्डा, सभासञ्चालनं डा. निवेदिताकरश्च व्यदधन्। प्रास्ताविकत्वेन कार्यक्रमस्य उपयोगिता, मौलानामहोदयस्य शैक्षिकचिन्तनानि, तदीयदर्शनञ्च विभागाध्यक्षः डा. रमाकान्तमिश्रः प्राकटयत्। अतिथित्वेन पुराणविभागाध्यक्षः प्रो. फकीरचरणपण्डा, मुख्यवक्तृत्वेन नवागतः वरिष्ठाचार्यः प्रो. सुदेशकुमारशर्मा, सभाध्यक्षत्वेन परिसरप्राचार्यः डा.जि.गङ्गान्नावर्यः च स्वीयविचारान् प्राकटयन्। अन्ते विजेतृभ्यः छात्रेभ्यः पुरस्काराः वितीर्णाः।



सर्वभारतीयज्योतिषसम्मेलने सभां सम्बोधयन् आचार्यः के.बी. सुब्बरायुडुः

**सर्वभारतीयज्योतिषसम्मेलनम्–** परिसरे नवम्बरमासस्य १२-१३ इति दिनद्वयव्यापि किञ्चन सर्वभारतीयज्योतिषसम्मेलनम् प्रवृत्तम्। तच्च १२.११.२०११ दिनाङ्के राष्ट्रियसंस्कृतसंस्थानस्य कुलसचिवेन प्रो. के. बि. सुब्बारायुडुमहोदयेन समुदघाटितम्। प्रदीपप्रज्ज्वालनपुरस्सरं कार्यक्रमस्य उद्घाटनं समजायत। प्रकाशचन्द्रशतपथी वैदिकमङ्गलाचरणं व्यदधात्। ज्योतिषविभागाध्यक्षः डा. प्रभातरञ्जनमहापात्रः स्वागतभाषणं, डा. विश्वरञ्जनपतिश्च धन्यवादभाषणमकुरुताम्। मुख्यातिथित्वेन बनारसहिन्दूविश्वविद्यालयस्य संस्कृतविद्याधर्मविज्ञानसङ्कायस्य ज्योतिषविभागाध्यक्षः प्रो. सच्चिदानन्दमिश्रः, मुख्यवक्तृत्वेन डा.निमाईचरण बनर्जी, विशिष्टातिथित्वेन कोलकातातः समायातः प्रो. सत्यविश्वासः, सम्मानितातिथित्वेन प्रो.सी. पी. शर्मा, डा. प्रमोदकुमारपात्रः, सांसद् श्री अनन्तनायकः च आसन्। सभायाः आध्यक्षं परिसरप्राचार्यः डा. गङ्गान्नामहोदयः निरवहत्।

१३.११.२०११ दिनाङ्काङ्किते रविवासरे तस्यैव सम्मेलनस्य समापनसमारोहे मुख्यातिथित्वेन श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. नीलकण्ठपतिः, मुख्यवक्तृत्वेन पण्डित शशिभूषणमिश्रः, विशिष्टातिथित्वेन D.I.G. श्री अरुणकुमारोपाध्यायः, I.P.S, सम्मानितातिथित्वेन प्रो. ए. डी. शर्मा, डा. सोमनाथचक्रवर्ती, सभापतित्वेन डा. सूर्यमणिरथश्च सभामलमकुर्वन्। स्वागतं डा. प्रभातरञ्जनमहापात्रः, धन्यवादसमर्पणं डा. विजयलक्ष्मीमहापात्रश्च अकुरुताम्।






# राष्ट्रियसंस्कृतसंस्थानम्

बहुपरिसरीयो बृहत्तमः मानितविश्वविद्यालयः

(भारतसर्वकार-मानवसंसाधनविकासमन्त्रालयान्तर्गतः) नवदेहली

पत्राचारमाध्यमेन संस्कृताध्ययनाय विशिष्टावसरः

## पत्राचारपाठ्यक्रमः
## (Correspondence Course)

सरलरीत्या सुगमविधिना च संस्कृतशिक्षणम्

राष्ट्रियसंस्कृतसंस्थानेन हिन्दी-आंग्लमाध्यमेन द्विवर्षीयः संस्कृतपरिचयपाठ्यक्रमः सञ्चाल्यते। अत्यन्तं मनोरञ्जकशैल्या सरलरीत्या च प्रस्तुतेऽस्मिन् पाठ्यक्रमे संस्कृतवाङ्मयस्य संक्षिप्तः परिचयः सरलीकृतैः व्याकरणांशैः प्रदत्तो वर्तते।

**विशेषाकर्षणानि** -

- सरलरीत्या हिन्दी-आंग्लमाध्यमेन विषयप्रतिपादनम्
- अत्यल्पं शुल्कम्
- संस्कृतवाङ्मयस्य अंशैः व्याकरणस्य उपस्थापनम् -

  शब्दरूपप्रक्रिया, कारकविभक्तिः, विशिष्टबोधः, सुभाषितानि, नाटकांशाः, लघुनाटकानि, आधुनिकविषयाधारिताः पाठाः, कथाः, अन्योक्तयः, प्रहेलिकाः, निबन्धाः, गद्य-पद्यसाहित्यम्, आधुनिकगीतयः चेत्यादयोऽंशाः।
- आधुनिकसंस्कृतसाहित्यस्य संयोजनम्
- वर्षे यदा कदापि पंजीकरणम्

**शुल्कम्** - भारतीयानां कृते - रू. २५०, वैदेशिकानां कृते - $ ५० (अमेरिकादेशीयम्)

शुल्कं साक्षात् अथवा डी. डी. द्वारा 'कुलसचिव, राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली' नाम्ना प्रेषणीयम्।

**पत्राचारसङ्केतः** - प्रभारी, पत्राचारपाठ्यक्रमः, राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः) ५६-५७, इंस्टीट्यूशनल् एरिया, जनकपुरी,
नवदेहली - ११० ०५८

अधिकं ज्ञातुमिच्छति चेत् अत्र सम्पर्कं कुर्वन्तु -

website - www.sanskrit.nic.in e-mail - rskscc@yahoo.com
०११-२८५२ ४९९३ (२३७)

इतोऽपि उच्चाध्ययनं कर्तुमिच्छन्ति चेत् राष्ट्रियसंस्कृतसंस्थानस्य मुक्तस्वाध्यायपीठेन सञ्चाल्यमानेषु पाठ्यक्रमेषु प्रवेशमर्हन्ति। तत्र पाठ्यक्रमा इत्थं सन्ति - प्राक्-शास्त्री (+२), शास्त्री (बी. ए.), आचार्यः (एम. ए.), संस्कृतावरणी (प्राक्शास्त्रिप्रवेशाय) संस्कृतावगाहनी (शास्त्रिप्रवेशाय) च। मुक्तस्वाध्यायपीठस्य सम्पर्कसङ्केतः अस्ति- mspeetham@gmail.com




Sanskritavarta : Quarterly News Bulletin of Rashtriya Sanskrit Sansthan Vol. IV Issue No.13-14 Pub. by the Registrar for Rashtriya Sanskrit Sansthan, 56-57, Institutional Area, Janakpuri, New Delhi-110058 & Printed at D.V. Printers, 97-U.B. Jawahar Nagar, Delhi-110007